CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किम् (कौन), स्त्रीलिंग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	का	के	काः
द्वि०	काम्	,,	,,
तृ०	कया	काभ्याम्	काभिः
च०	कस्यै	,,	काभ्यः
पं०	कस्याः	,,	,,
ष०	,,	कयोः	कासाम्
स०	कस्याम्	,,	कासु

इदम् (यह), पुंल्लिग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	अयम्	इमौ	इमे
द्वि०	इमम्	,,	इमान्
तृ०	अनेन	आभ्याम्	एभिः
च०	अस्मै	,,	एभ्यः
प०	अस्मात्	,,	,,
ष०	अस्य	अनयोः	एषाम्
स०	अस्मिन्	,,	एषु

इदम् (यह), नपुंसकलिंग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	इदम्	इमे	इमानि
द्वि०	इदम्	इमे	इमानि

शेष रूप पुंल्लिग की तरह बनते हैं।

इदम् (यह), स्त्रीलिंग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	इयम्	इमे	इमाः
द्वि०	इमाम्	,,	,,
तृ०	अनया	आभ्याम्	आभिः
च०	अस्यै	,,	आभ्यः
पं०	अस्याः	,,	,,
ष०	,,	अनयोः	आसाम्
स०	अस्याम्		आसु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अस्मद् (मैं)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	अहम्	आवाम्	वयम्
द्वि०	माम्, मा	आवाम्, नौ	अस्मान्, नः
तृ०	मया	आवाभ्याम	अस्माभिः
च०	मह्यम्, मे	आवाभ्याम्, नौ	अस्मभ्याम्, नः
पं०	मत्	आवाभ्याम्	अस्मत्
ष०	मम, मे	आवयोः नौ	अस्माकम्, नः
स०	मयि	आवयोः	अस्मासु

युष्मद् (तुम)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र०	त्वम्	युवाम्	यूयम्
द्वि०	त्वाम्, त्वा	युवाम्, वां	युष्मान्, वः
तृ०	त्वया	युवाभ्याम्	युष्माभिः
च०	तुभ्यम्, ते	युवाभ्याम्, वां	युष्मभ्यम्, वः
पं०	त्वत्	युवाभ्याम्	युष्मत्
ष०	तव, ते	युवयोः, वां	युष्माकम्, वः
स०	त्वयि	युवयोः	युष्मासु

सर्व, पुंल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सर्वः	सर्वौ	सर्वे
द्वितीया	सर्वम्	सर्वौ	सर्वान्
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

सर्व, नपुंसकलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सर्वम्	सर्वे	सर्वाणि
द्वितीया	सर्वम्	सर्वे	सर्वाणि
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्व, स्त्रीलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सर्वा	सर्वे	सर्वाः
द्वितीया	सर्वाम्	सर्वे	सर्वाः
तृतीया	सर्वया	सर्वाभ्याम्	सर्वाभिः
चतुर्थी	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
पञ्चमी	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
षष्ठी	सर्वस्याः	सर्वयोः	सर्वासाम्
सप्तमी	सर्वस्याम्	सर्वयोः	सर्वासु

सर्वनाम शब्द-रूपों का वाक्य में प्रयोग—

प्रथमा विभक्ति एकवचन—

तत्— सः मम भ्राता अस्ति।
तत् मम पुस्तकम् अस्ति।
सा मम भगिनी अस्ति।

यत्— यः विद्यालयं गच्छति सः मम मित्रम् अस्ति।
यत् तव हस्ते, तत् मम चित्रम् अस्ति।
या गृहे तिष्ठति सा मम माता अस्ति।

किम्— अत्र कः तिष्ठति ?
रामस्य मुखे किम् वस्तु वर्तते ?
कृष्णस्य मनसि का सुन्दरी तिष्ठति ?

इदम्— अयं बालकः अतीव चञ्चलः अस्ति।
इदं चित्रं मनोहरं वर्तते।
इयं देवी मन्दिरं गता।

अस्मद्— अहं गुरुजनस्य अभिप्रायं न जानामि।

युष्मद्— त्वं देवमन्दिरं न गच्छसि।

प्रथमा विभक्ति, द्विवचन—

तत्— तौ बालकौ फलानि खादतः।
ते पुस्तके गृहे न स्तः।
ते लते पुष्पिते जाते।

यत्— तौ मम भ्रातरौ यौ विद्यालयं गच्छतः।
ते एव बालाय रोचेते ये चित्रे सुन्दरे स्तः।
ते न पण्डिते, ये छात्रे सभायां न तिष्ठतः।

किम्— रामेण सह कौ वनं गतौ ?
तुभ्यं के वस्तु रोचेते ?
के छात्रे तत्र गते ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदम्— इमौ बालकौ नेतारौ भविष्यतः।
इमे फले मधुरे स्तः।
इमे माले रामाय देहि।

अस्मद्— आवाम् अत्र न आगमिष्याव:।

युष्मद्— युवां किं पठथ: ?

प्रथमा विभक्ति, बहुवचन—

तत्— ते मोहनस्य पुत्राः सन्ति।
तानि देवस्य पुस्तकानि सन्ति।
ताः बाधाः रामस्य मार्गे न सन्ति।

यत्— ये पठन्ति ते सफलाः भवन्ति।
यानि पुस्तकानि पटले सन्ति तानि रामाय प्रयच्छ।
याः देवताः शीघ्रम् प्रसन्नाः भवन्ति ताः अत्र पूज्यन्ते।

किम्, इदम्—इमे सर्वे के सन्ति ?
इमानि सर्वाणि कानि सन्ति ?
इमाः सर्वाः का सन्ति ?

अस्मद्— वयं हिन्दुराष्ट्राङ्गभूताः त्वां सादरं नमामः।

युष्मद्— यूयं भारतस्य वन्दनां कुरुत।

द्वितीया विभक्ति—

तत्— तं बालकं को न जानाति ?
तत् पत्रं पीतं वर्तते।
तां धारां नाहं पश्यामि।

यत्— यं पृच्छसि स एव प्रतिषेधं करोति।
यत्किंचित् ब्रूहि।
यां बालिकां त्वं पश्यसि सा देवस्य भगिनी अस्ति।

किम्— कं बालकम् आह्वयसि ?
किं फलम् इच्छसि ?
कां देवीं प्रसन्नां करिष्यसि।

इदम्— इमं बालकं न ताडय।
इदं फलम् आनय।
इमां नारीं पृच्छ।

अस्मद्— सः मां ताडयति।

युष्मद्— अहं त्वां पृच्छामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीया विभक्ति—

तत्— स: तेन सह वसति ।
तेन पात्रेण सह इदं पात्रमपि धारय ।
अहं तया सह उपवनं गमिष्यामि ।

यत्— येन पुत्रेण सुखं नास्ति तेन को लाभ: ?
येन ज्ञानेन मुक्तिर्नास्ति तत् किं ज्ञानम् ?
यया रस: न प्राप्यते सा का कविता ?

किम्— केन इदं पत्रं लिखितम् ?
केन कारणेन त्वं गृहे न तिष्ठसि ?
कया भाषया त्वं पत्रं लिखसि ?

इदम्— अनेन भूपेन सह मैत्रीं कुरु ।
अनेन मित्रेण सह वार्तां कुरु ।
अनया कथया किं प्रयोजनम् अस्ति ?

अस्मद्— मया हसितम् ।

युष्मद्— त्वया रुदितम् ।

चतुर्थी विभक्ति—

तत्— तस्मै श्रीगुरवे नम: ।
तस्मै कुण्डलाय हिरण्यम् आनय ।
तस्यै देव्यै निवेदयामि ।

यत् किम्— यस्मै कस्मैचिद् दातुमिच्छामि ।
यस्यै कस्यैचिद् लिखितुम् इच्छामि ।

किम्— त्वं कस्मै फलाय स्पृहयसि ?

इदम्— अस्मै किं रोचते ?
अस्यै अहं सर्वस्वं दास्यामि ।

अस्मद्— मह्यं पुस्तकं देहि ।

युष्मद्— तुभ्यं मोदकम् आनयामि ।

पञ्चमी विभक्ति—

तत्— तस्मात् त्वं मह्यं कुप्यसि ।
तस्या: विना मम जीवनं न भविष्यति ।

यत्— यस्मात् हेतो: त्वं क्रुध्यसि तदहं जानामि ।
यस्या: विना त्वं चिन्तितोऽसि सा मम गृहे वर्तते ।

किम्— त्वं कस्मात् दूरवीक्षणं न क्रीणासि ?
कस्या: नद्या: जलम् आनयसि ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदम्— अस्मात् विना तव निर्वाहः न भविष्यति ।
अस्याः पुस्तकं गृहाण ।
अस्मद्— मत् दूरं तिष्ठ ।
युष्मद्— त्वत् तु मम सेवकोऽपि विद्वत्तरः अस्ति ।

षष्ठी विभक्ति—

तत्— सः तस्य पुत्रः अस्ति ।
तस्य मित्रस्य दर्शनं सुखदम् अस्ति ।
तस्याः जनन्याः पुत्रं देशभक्तम् आसीत् ।
यत्— यस्य भाग्ये सुखं नास्ति सः वृथा श्रमं करोति ।
यस्याः समीपे पुत्ररत्नमस्ति सा एव धन्या ।
किम्— कस्य गृहे चौराः प्रविष्टाः ?
कस्याः नद्याः जलं पवित्रम् ?
इदम्— अस्य ज्ञानं मोक्षप्रदं वर्तते ।
अस्याः हृदयम् अतीव शुद्धमस्ति ।
अस्मद्— मम माता त्वां जानाति ।
युष्मद्— तव पिता मां जानाति ।

सप्तमी विभक्ति —

तत्— मम हृदयं तस्मिन् (तस्यां वा) विश्वसिति ।
यत्— यस्मिन् यस्यां वा मेऽभिलाषः सः (सा वा) अत्र न विद्यते ।
किम्— कस्मिन् (कस्यां वा) तव मनः स्नेहयति ।
इदम्— अस्मिन् (अस्यां वा) मम मनः स्नेहयति ।
अस्मद्, युष्मद्—मूर्खः मयि (त्वयि वा) सुष्ठु न व्यवहरति ।

संख्यावाचक शब्द

एक=एक

(केवल एकवचन में तीनों लिंगों में पृथक्-पृथक् रूप होते हैं ।)

विभक्ति	पुंल्लिङ्ग	नपुंसकलिङ्ग	स्त्रीलिङ्ग
प्रथमा	एकः	एकम्	एका
द्वितीया	एकम्	एकम्	एकाम्
तृतीया	एकेन	एकेन	एकया
चतुर्थी	एकस्मै	एकस्मै	एकस्यै
पञ्चमी	एकस्मात्	एकस्मात्	एकस्याः
षष्ठी	एकस्य	एकस्य	एकस्याः
सप्तमी	एकस्मिन्	एकस्मिन्	एकस्याम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वि=दो

(केवल द्विवचन में रूप होते हैं।)

विभक्ति	पुंल्लिङ्ग	नपुंसकलिङ्ग	स्त्रीलिङ्ग
प्रथमा	द्वौ	द्वे	द्वे
द्वितीया	द्वौ	द्वे	द्वे
तृतीया	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
चतुर्थी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
पञ्चमी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
षष्ठी	द्वयोः	द्वयोः	द्वयोः
सप्तमी	द्वयोः	द्वयोः	द्वयोः

त्रि=तीन

(केवल बहुवचन में रूप होते हैं।)

विभक्ति	पुंल्लिङ्ग	नपुंसकलिङ्ग	स्त्रीलिङ्ग
प्रथमा	त्रयः	त्रीणि	तिस्रः
द्वितीया	त्रीन्	त्रीणि	तिस्रः
तृतीया	त्रिभिः	त्रिभिः	तिसृभिः
चतुर्थी	त्रिभ्यः	त्रिभ्यः	तिसृभ्यः
पञ्चमी	त्रिभ्यः	त्रिभ्यः	तिसृभ्यः
षष्ठी	त्रयाणाम्	त्रयाणाम्	तिसृणाम्
सप्तमी	त्रिषु	त्रिषु	तिसृषु

चतुर्=चार

(केवल बहुवचन में रूप होते हैं।)

विभक्ति	पुंल्लिङ्ग	नपुंसकलिङ्ग	स्त्रीलिङ्ग
प्रथमा	चत्वारः	चत्वारि	चतस्रः
द्वितीया	चतुरः	चत्वारि	चतस्रः
तृतीया	चतुर्भिः	चतुर्भिः	चतसृभिः
चतुर्थी	चतुर्भ्यः	चतुर्भ्यः	चतसृभ्यः
पञ्चमी	चतुर्भ्यः	चतुर्भ्यः	चतसृभ्यः
षष्ठी	चतुर्णाम्	चतुर्णाम्	चतसृणाम्
सप्तमी	चतुर्षु	चतुर्षु	चतसृषु

विशेष—पञ्चन्, षष्, सप्तन्, अष्टन्, नवन्, दशन् के तीनों लिंगों में समान रूप होते हैं।

विभक्ति	पञ्चन्	षष्	सप्तन्	अष्टन्	नवन्	दशन्
प्रथमा	पञ्च	षट्-षड्	सप्त	अष्टौ-अष्ट	नव	दश
द्वितीया	पञ्च	षट्-षड्	सप्त	अष्टौ-अष्ट	नव	दश

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभक्ति	पञ्चन्	षष्	सप्तन्	अष्टन्	नवन्	दशन्
तृतीया	पञ्चभिः	षड्भिः	सप्तभिः	अष्टभिः-अष्टाभिः	नवभिः	दशभिः
चतुर्थी	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टभ्यः अष्टाभ्यः	नवभ्यः	दशभ्यः
पञ्चमी	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	,,	नवभ्यः	दशभ्यः
षष्ठी	पञ्चानाम्	षण्णाम्	सप्तानाम्	अष्टानाम्	नवानाम्	दशानाम्
सप्तमी	पञ्चसु	षट्सु	सप्तसु	अष्टसु, अष्टासु	नवसु	दशसु

क्रमबोधक पूरणार्थक संख्या शब्द निम्नलिखित हैं :

अंक	पुंल्लिङ्ग	नपुंसकलिङ्ग	स्त्रीलिङ्ग
१ (एकः)	प्रथमः	प्रथमम्	प्रथमा
२ (द्वि)	द्वितीयः	द्वितीयम्	द्वितीया
३ (त्रि)	तृतीयः	तृतीयम्	तृतीया
४ (चतुर्)	चतुर्थः	चतुर्थम्	चतुर्थी
५ (पञ्च)	पञ्चमः	पञ्चमम्	पञ्चमी
६ (षट्)	षष्ठः	षष्ठम्	षष्ठी
७ (सप्त)	सप्तमः	सप्तमम्	सप्तमी
८ (अष्ट)	अष्टमः	अष्टमम्	अष्टमी
९ (नव)	नवमः	नवमम्	नवमी
१० (दश)	दशमः	दशमम्	दशमी

विविध पदों का वाक्यों में प्रयोग

निम्नलिखित पदों को वाक्यों में प्रयुक्त करो :

साधूनाम्, मतीनाम्, तासाम्, गच्छताम्, राज्ञाम्, युष्माकम्, विदुषाम्, केषाम्, कविभ्यः, लताभ्यः, तेभ्यः, गच्छद्भ्यः, गच्छन्त्या, भ्रात्रा, फलानि, तस्यै, भानोः, नदीनाम्, विद्वद्भ्यः, वारिणा, भवतः, आत्मना, स्त्रीभ्याम्, के, द्वौ, तस्मै ।

साधूनाम्— साधूनां संगतं हितकरं भवति ।

मतीनाम्— वैज्ञानिकानां मतीनां विलसनं सर्वत्र चमत्करोति ।

तासाम्— तासां गीतं मधुरम् आसीत् ।

गच्छताम्— गच्छतां जनानां शीघ्रम् अनुसरणं कुरुत ।

राज्ञाम्— राज्ञां स्वभावः एव ईदृशः वर्तते ।

युष्माकं— युष्माकं हृदयं न कोऽपि जानाति ।

विदुषां— अष्टावक्रः विदुषां सभायाम् अवदत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केषां— मया केषामपि पत्राणि न प्राप्तानि ।
कविभ्यः— राजा कविभ्यः प्रभूतं धनम् अयच्छत् ।
लताभ्यः— प्रकृतिः लताभ्यः पुष्पाणि प्रयच्छति ।
तेभ्यः— तेभ्यः त्वं किं यास्यसि ?
गच्छद्भ्यः—राजा गुरुकुलं गच्छद्भ्यः पुत्रेभ्यः न्यवेदयत् ।
गच्छन्त्या— गृहं गच्छन्त्या त्वया सह अहमपि गमिष्यामि ।
भ्रात्रा— लक्ष्मणः भ्रात्रा सह यानम् अगच्छत् ।
फलानि— सः मधुराणि फलानि खादति ।
तस्यै— तस्यै अधुना किमपि न रोचते ।
भानोः— इन्दुः भानोः प्रकाशम् आददाति ।
नदीनाम्— तासां नदीनाम् उद्गमस्थानं कुत्र विद्यते ?
विद्वद्भ्यः— भोजः विद्वद्भ्यः लक्षद्वयम् अयच्छत् ।
वारिणा— कृषकाः वारिणा क्षेत्राणि सिञ्चन्ति ।
भवतः— अत्र आगत्य भवतः मनः शान्तं भविष्यति ।
आत्मना— आत्मना आत्मानम् उद्धरेत् ।
स्त्रीभ्याम्— एताभ्यां स्त्रीभ्यां अम्लपदार्थाः एव रोचन्ते ।
के— के फले तुभ्यं न रोचेते ?
द्वौ— द्वौ छात्रौ तत्र पठतः ।
तस्मै— सः तस्यै स्वकीयं पुस्तकम् अददात् ।

अभ्यास

1. **अधोलिखितानाम् रूपं लिखत :**

अधोलिखित के रूप लिखिए :

Decline the following :

किम् (स्त्री० सप्तमी विभक्ति) — राजन् (षष्ठी विभक्ति)
लता (तृतीया विभक्ति) — युष्मद् (तृतीया विभक्ति)
युष्मद् (पञ्चमी विभक्ति) — लता (पञ्चमी विभक्ति)

2. **निम्नांकितशब्दानां षष्ठीविभक्तिबहुवचनरूपाणि विलिख्य स्ववाक्येषु प्रयुक्त :**

निम्नांकित शब्दों के षष्ठी बहुवचन रूप लिखकर अपने वाक्यों में प्रयोग कीजिए :

Decline the following words in the genitive case in the plural number and use them in your sentences :

(*i*) साधु (*ii*) मति (*iii*) तत् (स्त्रीलिंग) (*iv*) गच्छत् (v) राजन् (*vi*) युष्मद् (*vii*) विद्वस् (*viii*) किम् ।

Funding by IKS-MoE.

3. निम्नांकितशब्दानां चतुर्थीविभक्तिबहुवचनरूपाणि विलिख्य स्ववाक्येषु प्रयुक्त :

निम्नांकित शब्दों के चतुर्थी बहुवचन रूप लिखकर अपने वाक्यों में प्रयोग कीजिए :

Decline the following words in the dative case in the plural number and use them in your sentences :

(*i*) कवि (*ii*) लता (*iii*) तत् (नपुंसकलिंग) (*iv*) गच्छत् (पुंल्लिग)

4. अधोलिखितानां यथानिर्दिष्टं रूप विधाय संस्कृतभाषायां वाक्यप्रयोगं कुरुत :

नीचे लिखों के यथानिर्दिष्ट रूप बनाकर संस्कृत भाषा में वाक्य बनाइये :

Make sentences in your Sanskrit from the formations as indicated below :

(*i*) गच्छत् (स्त्री०, प्र०, एक०), भ्रातृ (तृ०, एक०) ।
(*ii*) फल (द्वि०, बहु०), युष्मद् (पु०, ष०, बहु०) ।
(*iii*) तत् (स्त्री०, चतु०, एक०),
(*iv*) भवत् (पु०, ष०, एक०), आत्मन् (तृ० एक०) ।
(*v*) स्त्री (चतु०, द्वि०), किम् (नपुं०, प्र०, द्वि०) ।
(*vi*) द्वि (पु०, प्रथमा), तत् (पु०, चतु०, एक०) ।

5. अधोलिखितानां रूपाणि लिखत तेषां प्रयोगं स्ववाक्येषु कुरुत :

निम्नलिखित के रूप लिखिए और उसका अपने वाक्यों में प्रयोग कीजिए :

Illustrate the use of the following in your own sentences :

(*i*) भानु in पंचमी एकवचन;
(*ii*) नदी in षष्ठी बहुवचन;
(*iii*) विद्वस् in चतुर्थी बहुवचन;
(*iv*) वारि in तृतीया;
(*v*) भवत् in षष्ठी द्विवचन ।

6. कोष्ठगतसंकेतद्वारा रिक्तस्थानपूर्ति विधत्त :

कोष्ठ में दिए गए संकेत द्वारा रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks by means of clues indicated in the brackets :

(क) (*i*) वृक्षेषु (कपि)······अपि वसन्ति ।
(*ii*) त्वं पुस्तकानां (पठन्)······पण्डितो भविष्यसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(*iii*) कृषकाः (क्षेत्र)······बीजान् विकिरन्ति ।
(*iv*) वयं भ्रातृद्वितीयायां (भगिनी)······दक्षिणां दद्मः ।
(*v*) गंगा (हिमालय)······निःसरति ।
(संकेत—कपयः, पठनेन, क्षेत्रेषु, भगिन्यै, हिमालयात्)

(ख) (*i*) स्वार्थं समीहते······। (सर्व)
(*ii*) अधोलिखितेषु द्वयोः······सविग्रहं नाम निर्दिशत । (समास)
(*iii*) स सुवर्णं······ददौ । (भिक्षुक)
(*iv*) आत्मना······उद्धरेत् । (आत्मन्)
(संकेत—सर्वः, समासयोः, भिक्षुकाय, आत्मानम्)

(ग) (*i*) ······कालिदासः श्रेष्ठः । (कवि)
(*ii*) ······विना कुतो विद्या ? (परिश्रम)
(संकेत—कविषु, परिश्रमम्)

(घ) (*i*) ······सर्वत्र पूज्यते । (विद्वस्)
(*ii*) शिक्षकः······ज्ञानं ददाति । (छात्र)
(*iii*) छात्राः······गच्छन्ति । (विद्यालय)
(संकेत—विद्वान्, छात्राय, विद्यालयम्)

7. अधोलिखितानां रूपाणि निर्दिष्टविभक्तीनां सर्वेषु वचनेषु रूपाणि लिखत :

निम्नलिखित शब्दों के रूप निर्दिष्ट विभक्ति के सभी वचनों में लिखिए :

Decline the following words in all the numbers of the given cases :

(क) मुनि (तृतीया), साधु (चतुर्थी), पितृ (प्रथमा), युष्मद् (षष्ठी), भवत् (प्रथमा) ।

(ख) राजन् (सप्तमी), अस्मत् (पञ्चमी), हरि (तृतीया), तत् (प्रथमा), चन्द्रमस् (द्वितीया), पितृ (प्रथमा) ।

(ग) बालक (सप्तमी), दातृ (द्वितीया), राजन् (तृतीया), तत् (पुं०, प्रथमा), किम् (नपुं०, चतुर्थी) ।

(घ) कवि (प्रथमा), रिपु (पञ्चमी), विद्वस् (प्रथमा), अस्मद् (चतुर्थी), इदम् (स्त्री०, द्वितीया) ।

(ङ) मुनि (सप्तमी), भानु (चतुर्थी), मातृ (द्वितीया), यत् (पुं०, पञ्चमी), युष्मद् (प्रथमा) ।

—०—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

4

धातु-रूप
(CONJUGATION)

क्रिया के मूल रूप (Root) को धातु कहते हैं। विभिन्न काल तथा अवस्थाओं में, तीनों पुरुषों तथा तीनों वचनों में धातु के साथ तिङ् प्रत्ययों को जोड़ा जाता है। समस्त धातुओं को दस गणों (Classes) में बांटा गया है तथा इन गणों के पृथक्-पृथक् चिह्न (विकरण) होते हैं जिनको तिङ् प्रत्यय से पूर्व धातु में लगाया जाता है।

इन गणों के नाम तथा चिह्न निम्नलिखित हैं :

क्र०	गणनाम (Class)	धातुएँ	विकरण	चिह्न
1.	भ्वादिगण	भू आदि धातुएँ	शप्	अ, गुण
2.	अदादिगण	अद् ,, ,,	शप् का लुक्	×
3.	जुहोत्यादिगण	हु ,, ,,	शप् का श्लु	×, द्वित्व
4.	दिवादिगण	दिव् ,, ,,	श्यन्	य
5.	स्वादिगण	सु ,, ,,	श्नु	नु
6.	तुदादिगण	तुद् ,, ,,	श	अ
7.	रुधादिगण	रुध् ,, ,,	श्नम्	न
8.	तनादिगण	तन् ,, ,,	उ	उ
9.	क्रयादिगण	क्री ,, ,,	श्ना	ना
10.	चुरादिगण	चुर् ,, ,,	णिच् (इ) +शप्	अय, गुण

लकार—विभिन्न कालों तथा अवस्थाओं को लकार कहा जाता है। संस्कृत में कुल ग्यारह लकार होते हैं जिनमें से निम्न पांच लकार ही हमारे पाठ्यक्रम में निर्धारित हैं।

(क) लट् लकार (वर्तमान काल, Present Tense)—भवति इत्यादि
(ख) लङ् लकार (भूतकाल, Past Tense)—अभवत् इत्यादि
(ग) लृट् लकार (भविष्यत्काल, Future Tense)—भविष्यति इत्यादि
(घ) लोट् लकार (आज्ञादि, Imperative Mood)—भवतु इत्यादि
(ङ) विधिलिङ् लकार (विध्यादि, Potential Mood)—भवेत् इत्यादि।

विधिलिङ् का प्रयोग नम्रतापूर्वक आदेश देने, कार्य कराने, सलाह देने,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निमन्त्रण देने, प्रेमपूर्वक आग्रह तथा सत्कारपूर्वक व्यापार, प्रश्न एवं प्रार्थना आदि अर्थों में होता है। यह चाहिए अर्थ को भी प्रकट करता है।

तिङ् प्रत्यय (Tense suffixes)—धातुओं से लकारों के रूप बनाने के हेतु जो प्रत्यय जोड़े जाते हैं उन्हें तिङ् प्रत्यय कहते हैं। तिङ् प्रत्यय लगने पर शब्दों की तिङन्त संज्ञा हो जाती है। तिप् से लेकर महिङ् तक तिङ् प्रत्ययों की संख्या अठारह है। समस्त धातुओं को अर्थ की दृष्टि से प्रायः परस्मैपद तथा आत्मनेपद—इन दो भागों में बाँटा गया है। कुछ धातुएँ उभयपदी होती हैं। नौ प्रत्यय परस्मैपद के हैं तथा नौ प्रत्यय आत्मनेपद के। पुरुष तथा वचन का भेद दिखलाते हुए तिङ् प्रत्ययों को निम्न तालिका के माध्यम से समझा जा सकता है :

तिङ्, परस्मैपद

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	तिप् (ति)	तस् (तः)	झि (अन्ति)
	(वह, यह)	(वे दो, ये दो)	(वे सब, ये सब)
मध्यम पुरुष	सिप् (सि)	थस् (थः)	थ
	(तू)	(तुम दो)	(तुम सब)
उत्तम पुरुष	मिप् (मि)	वस् (वः)	मस् (मः)
	(मैं)	(हम दो)	(हम सब)

तिङ्, आत्मनेपद

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	त	आताम्	झ (अन्त)
	(वह, यह)	(वे दो, ये दो)	(वे सब, ये सब)
मध्यम पुरुष	थास् (थाः)	आथाम्	ध्वम्
	(तू)	(तुम दो)	(तुम सब)
उत्तम पुरुष	इट् (इ)	वहिङ् (वहि)	महिङ् (महि)
	(मैं)	(हम दो)	(हम सब)

विभिन्न लकारों में उपर्युक्त प्रत्ययों का निम्न स्वरूप हो जाता है। जैसे—

तिङ्, परस्मैपद

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	ति	तः	अन्ति
म० पु०	सि	थः	थ
उ० पु०	मि	वः	मः

उत्तम पुरुष में आ जुड़ जाता है।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लङ् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	त्	ताम्	अन्
म० पु०	स् (:)	तम्	त
उ० पु०	अम्	व	म

लङ् लकार में धातु से पूर्व (अ) लगता है।

लृट् लकार

प्र० पु०	स्यति	स्यतः	स्यन्ति
म० पु०	स्यसि	स्यथः	स्यथ
उ० पु०	स्यामि	स्यावः	स्यामः

लोट् लकार

प्र० पु०	तु, तात्	ताम्	अन्तु
म० पु०	०, तात्	तम्	त
उ० पु०	आनि	आव	आम

विधिलिङ्

(भ्वादि, दिवादि, तुदादि तथा चुरादि गणों में)

प्र० पु०	इत्	इताम्	इयुः
म० पु०	इः	इतम्	इत
उ० पु०	इयम्	इव	इम

(शेष गणों में)

प्र० पु०	यात्	याताम्	युः
म० पु०	याः	यातम्	यात
उ० पु०	याम्	याव	याम

तिङ्, आत्मनेपद

लट् लकार

प्र० पु०	ते	इते	अन्ते
म० पु०	से	इथे	ध्वे
उ० पु०	इ	वहे	महे

लङ् लकार

प्र० पु०	त	इताम्	अन्त
म० पु०	थाः	इथाम्	ध्वम्
उ० पु०	ए	वहि	महि

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लृट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	स्यते	स्येते	स्यन्ते
म० पु०	स्यसे	स्येथे	स्यध्वे
उ० पु०	स्ये	स्यावहे	स्यामहे

लोट् लकार

प्र० पु०	ताम्	इताम्	अन्ताम्
म० पु०	स्व	इथाम्	ध्वम्
उ० पु०	ऐ	आवहे	आमहे

विधिलिङ्

प्र० पु०	इत	इयाताम्	इरन्
म० पु०	इथाः	इयाथाम्	इध्वम्
उ० पु०	इय	इवहि	इमहि

विशेष—1. भ्वादिगण, दिवादिगण, तुदादिगण तथा चुरादिगण की धातुओं के साथ प्रत्येक लकार के उत्तम पुरुष में प्रत्यय से पूर्व आ भी लगता है जैसे भवामि, भवावः, भवामः, दीव्यामि, दीव्यावः, दीव्यामः, तुदामि, तुदावः, तुदामः, चोरयामि, चोरयावः, चोरयामः, इत्यादि ।

2. भू, पठ् आदि सेट् धातुओं के लृट् लकार में धातु के साथ इ (इट्) जुड़ जाता है । जैसे भविष्यति, पठिष्यति इत्यादि ।

3. याच्, नी तथा हृ इत्यादि कुछ धातुएँ उभयपदी होती हैं जिनके साथ परस्मैपद तथा आत्मनेपद दोनों के प्रत्यय लगते हैं । भ्वादिगण की पठ्, भू, पा, गम्, स्था, दृश्, दा, स्मृ तथा घ्रा व सद् (परस्मैपदी), लभ्, सेव्, मुद् (आत्मनेपदी) तथा याच्, नी, हृ (उभयपदी) धातुओं के रूप नीचे दिए जा रहे हैं ।

पठ् धातु (पढ़ना)

लट् लकार (वर्तमान काल)

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	पठति (वह पढ़ता है)	पठतः (वे दो पढ़ते हैं)	पठन्ति (वे सब पढ़ते हैं)
म० पु०	पठसि (तू पढ़ता है)	पठथः (तुम दो पढ़ते हो)	पठथ (तुम सब पढ़ते हो)
उ० पु०	पठामि (मैं पढ़ता हूँ)	पठावः (हम दो पढ़ते हैं)	पठामः (हम सब पढ़ते हैं)

लङ् लकार (भूतकाल)

प्र० पु०	अपठत् (वह पढ़ा)	अपठताम् (वे दो पढ़े)	अपठन् (वे सब पढ़े)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

	एकवचन	द्विवचन	बहुवचन
म० पु०	अपठः	अपठतम्	अपठत
	(तू पढा)	(तुम दो पढ़े)	(तुम सब पढ़े)
उ० पु०	अपठम्	अपठाव	अपठाम
	(मैं पढ़ा)	(हम दो पढ़े)	(हम सब पढ़े)

लोट् लकार (आज्ञादि)

प्र० पु०	पठतु	पठताम्	पठन्तु
	(वह पढ़े)	(वे दो पढ़ें)	(वे सब पढ़ें)
म० पु०	पठ	पठतम्	पठत
	(तू पढ़)	(तुम दो पढ़ो)	(तुम सब पढ़ो)
उ० पु०	पठानि	पठाव	पठाम
	(मैं पढ़ूँ)	(हम दो पढ़ें)	(हम सब पढ़ें)

विधिलिङ (विधि आदि)

प्र० पु०	पठेत्	पठेताम्	पठेयुः
	(उसे पढ़ना चाहिए)	(उन दो को पढ़ना चाहिए)	(उन्हें पढ़ना चाहिए)
म० पु०	पठेः	पठेतम्	पठेत
	(तुझे पढ़ना चाहिए)	(तुम दो को पढ़ना चाहिए)	(तुम सबको पढ़ना चाहिए)
उ० पु०	पठेयम्	पठेव	पठेम
	(मुझे पढ़ना चाहिए)	(हम दो को पढ़ना चाहिए)	(हम सबको पढ़ना चाहिए)

लृट लकार (भविष्यत्काल)

प्र० पु०	पठिष्यति	पठिष्यतः	पठिष्यन्ति
	(वह पढ़ेगा)	(वे दो पढ़ेंगे)	(वे सब पढ़ेंगे)
म० पु०	पठिष्यसि	पठिष्यथः	पठिष्यथ
	(तू पढ़ेगा)	(तुम दो पढ़ोगे)	(तुम सब पढ़ोगे)
उ० पु०	पठिष्यामि	पठिष्यावः	पठिष्यामः
	(मैं पढ़ूँगा)	(हम दो पढ़ेंगे)	(हम सब पढ़ेंगे)

भू धातु (होना)

लट् लकार (वर्तमान काल)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	भवति	भवतः	भवन्ति
	(वह होता है)	(वे दो होते हैं)	(वे सब होते हैं)
मध्यम पुरुष	भवसि	भवथः	भवथ
	(तू होता है)	(तुम दो होते हो)	(तुम सब होते हो)
उत्तम पुरुष	भवामि	भवावः	भवामः
	(मैं होता हूँ)	(हम दो होते हैं)	(हम सब होते हैं)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लृट् लकार (भविष्यत्काल)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	भविष्यति (वह होगा)	भविष्यतः (वे दो होंगे)	भविष्यन्ति (वे सब होंगे)
मध्यम पुरुष	भविष्यसि (तू होगा)	भविष्यथः (तुम दो होंगे)	भविष्यथ (तुम सब होंगे)
उत्तम पुरुष	भविष्यामि (मैं हूंगा)	भविष्यावः (हम दो होंगे)	भविष्यामः (हम सब होंगे)

लोट् लकार (आज्ञार्थक)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	भवतु (वह हो)	भवताम् (वे दो हों)	भवन्तु (वे सब हों)
मध्यम पुरुष	भव (तू हो)	भवतम् (तुम दो हो)	भवत (तुम सब हो)
उत्तम पुरुष	भवानि (मैं होऊँ)	भवाव (हम दो होवें)	भवाम (हम सब हों)

लङ् लकार (भूतकाल)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अभवत् (वह हुआ)	अभवताम् (वे दो हुए)	अभवन् (वे सब हुए)
मध्यम पुरुष	अभवः (तू हुआ)	अभवतम् (तुम दो हुए)	अभवत (तुम सब हुए)
उत्तम पुरुष	अभवम् (मैं हुआ)	अभवाव (हम दो हुए)	अभवाम (हम सब हुए)

विधिलिङ् लकार (विधि आदि)

प्रथम पुरुष	भवेत् (वह होवे)	भवेताम् (वे दो होवें)	भवेयुः (वे सब होवें)
मध्यम पुरुष	भवेः (तू हो)	भवेतम् (तुम दो हो)	भवेत (तुम सब हो)
उत्तम पुरुष	भवेयम् (मैं होऊँ/मुझे होना चाहिए)	भवेव (हम दो होवें/हम दोनों को होना चाहिए)	भवेम (हम सब हों/हम सब को होना चाहिए)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पा धातु (पीना)

पा धातु को लट्, लङ्, लोट् तथा विधिलिङ् में 'पिब्' आदेश हो जाता है किन्तु लृट् में पा ही रहता है। जैसे—

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	पिबति	पिबतः	पिबन्ति
म० पु०	पिबसि	पिबथः	पिबथ
उ० पु०	पिबामि	पिबावः	पिबामः

लङ् लकार

प्र० पु०	अपिबत्	अपिबताम्	अपिबन्
म० पु०	अपिबः	अपिबतम्	अपिबत
उ० पु०	अपिबम्	अपिबाव	अपिबाम

लोट् लकार

प्र० पु०	पिबतु	पिबताम्	पिबन्तु
म० पु०	पिब	पिबतम्	पिबत
उ० पु०	पिबानि	पिबाव	पिबाम

विधिलिङ्

प्र० पु०	पिबेत्	पिबेताम्	पिबेयुः
म० पु०	पिबेः	पिबेतम्	पिबेत
उ० पु०	पिबेयम्	पिबेव	पिबेम

लृट् लकार

प्र० पु०	पास्यति	पास्यतः	पास्यन्ति
म० पु०	पास्यसि	पास्यथः	पास्यथ
उ० पु०	पास्यामि	पास्यावः	पास्यामः

गम् (जाना)

गम् धातु को लट्, लङ्, लोट् तथा विधिलिङ् में गच्छ् आदेश हो जाता है, किन्तु लृट् में गम् ही रहता है। जैसे—

लट् लकार

प्र० पु०	गच्छति	गच्छतः	गच्छन्ति
म० पु०	गच्छसि	गच्छथः	गच्छथ
उ० पु०	गच्छामि	गच्छावः	गच्छामः

लङ् लकार

प्र० पु०	अगच्छत्	अगच्छताम्	अगच्छन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	एकवचन	द्विवचन	बहुवचन
म० पु०	अगच्छः	अगच्छतम्	अगच्छत
उ० पु०	अगच्छम्	अगच्छाव	अगच्छाम

लोट् लकार

प्र० पु०	गच्छतु	गच्छताम्	गच्छन्तु
म० पु०	गच्छ	गच्छतम्	गच्छत
उ० पु०	गच्छानि	गच्छाव	गच्छाम

विधिलिङ्

प्र० पु०	गच्छेत्	गच्छेताम्	गच्छेयुः
म० पु०	गच्छेः	गच्छेतम्	गच्छेत
उ० पु०	गच्छेयम्	गच्छेव	गच्छेम

लृट् लकार

प्र० पु०	गमिष्यति	गमिष्यतः	गमिष्यन्ति
म० पु०	गमिष्यसि	गमिष्यथः	गमिष्यथ
उ० पु०	गमिष्यामि	गमिष्यावः	गमिष्यामः

स्था (ठहरना)

स्था धातु को लट्, लङ्, लोट् तथा विधिलिङ् में तिष्ठ् आदेश हो जाता है, किन्तु लृट् लकार में 'स्था' ही रहता है। जैसे—

लट् लकार

प्र० पु०	तिष्ठति	तिष्ठतः	तिष्ठन्ति
म० पु०	तिष्ठसि	तिष्ठथः	तिष्ठथ
उ० पु०	तिष्ठामि	तिष्ठावः	तिष्ठामः

लङ् लकार

प्र० पु०	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
म० पु०	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उ० पु०	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

लोट् लकार

प्र० पु०	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
म० पु०	तिष्ठ	तिष्ठतम्	तिष्ठत
उ० पु०	तिष्ठानि	तिष्ठाव	तिष्ठाम

विधिलिङ्

प्र० पु०	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
म० पु०	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
उ० पु०	तिष्ठेयम्	तिष्ठेव	तिष्ठेम

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लृट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	स्थास्यति	स्थास्यत:	स्थास्यन्ति
म० पु०	स्थास्यसि	स्थास्यथ:	स्थास्यथ
उ० पु०	स्थास्यामि	स्थास्याव:	स्थास्याम:

दृश् (देखना)

दृश् धातु को लट्, लङ्, लोट् तथा विधिलिङ् में 'पश्य्' आदेश होता है किन्तु लृट् में दृश् ही रहता है। जैसे—

लट् लकार

प्र० पु०	पश्यति	पश्यत:	पश्यन्ति
म० पु०	पश्यसि	पश्यथ:	पश्यथ
उ० पु०	पश्यामि	पश्याव:	पश्याम:

लङ् लकार

प्र० पु०	अपश्यत्	अपश्यताम्	अपश्यन्
म० पु०	अपश्य:	अपश्यतम्	अपश्यत
उ० पु०	अपश्यम्	अपश्याव	अपश्याम

लोट् लकार

प्र० पु०	पश्यतु	पश्यताम्	पश्यन्तु
म० पु०	पश्य	पश्यतम्	पश्यत
उ० पु०	पश्यानि	पश्याव	पश्याम

विधिलिङ्

प्र० पु०	पश्येत्	पश्येताम्	पश्येयु:
म० पु०	पश्ये:	पश्येतम्	पश्येत
उ० पु०	पश्येयम्	पश्येव	पश्येम

लृट् लकार

प्र० पु०	द्रक्ष्यति	द्रक्ष्यत:	द्रक्ष्यन्ति
म० पु०	द्रक्ष्यसि	द्रक्ष्यथ:	द्रक्ष्यथ
उ० पु०	द्रक्ष्यामि	द्रक्ष्याव:	द्रक्ष्याम:

दा (देना)

दा धातु को लट्, लङ्, लोट् तथा विधिलिङ् में 'यच्छ्' आदेश हो जाता है। यच्छ् के रूप गच्छ् के समान चलेंगे। लृट् में दास्यति आदि रूप बनेंगे। जैसे—

लट् लकार

प्र० पु०	म० पु०	उ० पु०
यच्छति, त:, न्ति	यच्छसि, थ:, थ	यच्छामि, व:, म:

लङ् लकार

अयच्छत्, ताम्, न्	अयच्छ:, तम्, त	अयच्छम्, ाव, ाम

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोट् लकार

प्र० पु०	म० पु०	उ० पु०
यच्छतु, ताम्, न्तु	यच्छ, तम्, त	यच्छानि, व, म

विधिलिङ्

एकवचन	द्विवचन	बहुवचन
यच्छेत्, ताम्, युः	यच्छेः, तम्, त,	यच्छेयम्, व, म

लृट् लकार

प्र० पु०	दास्यति	दास्यतः	दास्यन्ति
म० पु०	दास्यसि	दास्यथः	दास्यथ
उ० पु०	दास्यामि	दास्यावः	दास्यामः

स्मृ धातु (याद करना)

लट् लकार

प्र० पु०	स्मरति	स्मरतः	स्मरन्ति
म० पु०	स्मरसि	स्मरथः	स्मरथ
उ० पु०	स्मरामि	स्मरावः	स्मरामः

लङ् लकार

प्र० पु०	अस्मरत्	अस्मरताम्	अस्मरन्
म० पु०	अस्मरः	अस्मरतम्	अस्मरत
उ० पु०	अस्मरम्	अस्मराव	अस्मराम

लोट् लकार

प्र० पु०	स्मरतु	स्मरताम्	स्मरन्तु
म० पु०	स्मर	स्मरताम्	स्मरत
उ० पु०	स्मराणि	स्मराव	स्मराम

विधिलिङ्

प्र० पु०	स्मरेत्	स्मरेताम्	स्मरेयुः
म० पु०	स्मरेः	स्मरेतम्	स्मरेत
उ० पु०	स्मरेयम्	स्मरेव	स्मरेम

लृट् लकार

प्र० पु०	स्मरिष्यति	स्मरिष्यतः	स्मरिष्यन्ति
म० पु०	स्मरिष्यसि	स्मरिष्यथः	स्मरिष्यथ
उ० पु०	स्मरिष्यामि	स्मरिष्यावः	स्मरिष्यामः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

घ्रा (जिघ्र) (सूंघना)

परस्मैपद

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	जिघ्रति	जिघ्रतः	जिघ्रन्ति
म० पु०	जिघ्रसि	जिघ्रथः	जिघ्रथ
उ० पु०	जिघ्रामि	जिघ्रावः	जिघ्रामः

लङ् लकार

प्र० पु०	अजिघ्रत्	अजिघ्रताम्	अजिघ्रन्
म० पु०	अजिघ्रः	अजिघ्रतम्	अजिघ्रत
उ० पु०	अजिघ्रम्	अजिघ्राव	अजिघ्राम

लोट् लकार

प्र० पु०	जिघ्रतु	जिघ्रताम्	जिघ्रन्तु
म० पु०	जिघ्र	जिघ्रतम्	जिघ्रत
उ० पु०	जिघ्राणि	जिघ्राव	जिघ्राम

विधिलिङ्

प्र० पु०	जिघ्रेत्	जिघ्रेताम्	जिघ्रेयुः
म० पु०	जिघ्रेः	जिघ्रेतम्	जिघ्रेत
उ० पु०	जिघ्रेयम्	जिघ्रेव	जिघ्रेम

लृट् लकार

प्र० पु०	घ्रास्यति	घ्रास्यतः	घ्रास्यन्ति
म० पु०	घ्रास्यसि	घ्रास्यथः	घ्रास्यथ
उ० पु०	घ्रास्यामि	घ्रास्यावः	घ्रास्यामः

सद् धातु (दुखी होना)

सद् धातु को लट्, लङ्, लोट् तथा विधिलिङ् में 'सीद्' आदेश हो जाता है, किन्तु लृट् में स्यति से पूर्व सद् को सत् हो जाता है। जैसे—

लट् लकार—सीदति, सीदतः, सीदन्ति इत्यादि।
लङ् लकार—असीदत्, असीदताम्, असीदन् इत्यादि।
लोट् लकार—सीदतु, सीदताम्, सीदन्तु इत्यादि।
विधिलिङ्—सीदेत्, सीदेताम्, सीदेयुः इत्यादि।
लृट् लकार—सत्स्यति, सत्स्यतः, सत्स्यन्ति इत्यादि।

कुछ अन्य परस्मैपदी धातुएँ तथा उनके लट् व लृट् में प्रथम पुरुष, एकवचन के रूप :

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

√ वस् (रहना)—वसति, वत्स्यति ।
√ वद् (बोलना)—वदति, वदिष्यति ।
√ हस् (हँसना)—हसति, हसिष्यति ।
√ नम् (झुकना)—नमति, नंस्यति ।
√ जि (जीतना)—जयति, जेष्यति ।
√ रक्ष् (रक्षा करना)— रक्षति, रक्षिष्यति ।
√ पत् (गिरना)—पतति, पतिष्यति ।
√ क्रीड् (खेलना)—क्रीडति, क्रीडिष्यति ।
√ क्रन्द् (चिल्लाना)—क्रन्दति, क्रन्दिष्यति ।
√ त्यज् (छोड़ना)—त्यजति, त्यक्ष्यति ।
√ चल् (चलना)—चलति, चलिष्यति ।
√ सृ (सरकना)—सरति, सरिष्यति ।
√ अट् (घूमना)—अटति, अटिष्यति ।
√ अर्ह् (योग्य होना)—अर्हति, अर्हिष्यति ।
√ खाद् (खाना)—खादति, खादिष्यति ।
√ गर्ज् (गरजना)—गर्जति, गर्जिष्यति ।
√ गै (गाना)—गायति, गास्यति ।
√ जीव् (जीना)—जीवति, जीविष्यति ।
√ व्रज् (जाना)—व्रजति, व्रजिष्यति इत्यादि ।

भ्वादिगण की आत्मनेपदी धातुएँ :

सेव्, लभ् तथा मुद् आदि आत्मनेपदी धातुएँ हैं जिनके पांचों लकारों में निम्न रूप बनते हैं :

√ सेव् (सेवा करना)

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	सेवते (वह सेवा करता है)	सेवेते (वे दो सेवा करते हैं)	सेवन्ते (वे सब सेवा करते हैं)
म० पु०	सेवसे (तू सेवा करता है)	सेवेथे (तुम दो सेवा करते हो)	सेवध्वे (तुम सब सेवा करते हो)
उ० पु०	सेवे (मैं सेवा करता हूँ)	सेवावहे (हम दो सेवा करते हैं)	सेवामहे (हम सब सेवा करते हैं)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लङ् लकार (भूतकाल)

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	असेवत (वह सेवा करता था)	असेवेताम् (वे दो सेवा करते थे)	असेवन्त (वे सब सेवा करते थे)
म० पु०	असेवथाः (तू सेवा करता था)	असेवेथाम् (तुम दो सेवा करते थे)	असेवध्वम् (तुम सब सेवा करते थे)
उ० पु०	असेवे (मैं सेवा करता था)	असेवावहि (हम दो सेवा करते थे)	असेवामहि (हम सब सेवा करते थे)

लोट् लकार (आज्ञादि)

प्र० पु०	सेवताम् (वह सेवा करे)	सेवेताम् (वे दो सेवा करें)	सेवन्ताम् (वे सब सेवा करें)
म० पु०	सेवस्व (तू सेवा कर)	सेवेथाम् (तुम दो सेवा करो)	सेवध्वम् (तुम सब सेवा करो)
उ० पु०	सेवै (मैं सेवा करूँ)	सेवावहै (हम दो सेवा करें)	सेवामहै (हम सब सेवा करें)

विधिलिङ् (विध्यादि)

प्र० पु०	सेवेत (उसे सेवा करनी चाहिए)	सेवेयाताम् (उन दो को सेवा करनी चाहिए)	सेवेरन् (उन सबको सेवा करनी चाहिए)
म० पु०	सेवेथाः (तुझे सेवा करनी चाहिए)	सेवेयाथाम् (तुम दो को सेवा करनी चाहिए)	सेवेध्वम् (तुम सबको सेवा करनी चाहिए)
उ० पु०	सेवेय (मुझे सेवा करनी चाहिए)	सेवेवहि (हम दो को सेवा करनी चाहिए)	सेवेमहि (हम सबको सेवा करनी चाहिए)

लृट् लकार (भविष्यत्काल)

प्र० पु०	सेविष्यते (वह सेवा करेगा)	सेविष्येते (वे दो सेवा करेंगे)	सेविष्यन्ते (वे सब सेवा करेंगे)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	एकवचन	द्विवचन	बहुवचन
म० पु०	सेविष्यसे (तू सेवा करेगा)	सेविष्येथे (तुम दो सेवा करोगे)	सेविष्यध्वे (तुम सब सेवा करोगे)
उ० पु०	सेविष्ये (मैं सेवा करूँगा)	सेविष्यावहे (हम दो सेवा करेंगे)	सेविष्यामहे (हम सब सेवा करेंगे)

लभ् धातु (प्राप्त करना)

लट् लकार

प्र० पु०	लभते	लभेते	लभन्ते
म० पु०	लभसे	लभेथे	लभध्वे
उ० पु०	लभे	लभावहे	लभामहे

लङ् लकार

प्र० पु०	अलभत	अलभेताम्	अलभन्त
म० पु०	अलभथाः	अलभेथाम्	अलभध्वम्
उ० पु०	अलभे	अलभावहि	अलभामहि

लोट् लकार

प्र० पु०	लभताम्	लभेताम्	लभन्ताम्
म० पु०	लभस्व	लभेथाम्	लभध्वम्
उ० पु०	लभै	लभावहै	लभामहै

विधिलिङ्

प्र० पु०	लभेत	लभेयाताम्	लभेरन्
म० पु०	लभेथाः	लभेयाथाम्	लभेध्वम्
उ० पु०	लभेय	लभेवहि	लभेमहि

लृट् लकार

प्र० पु०	लप्स्यते	लप्स्येते	लप्स्यन्ते
म० पु०	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उ० पु०	लप्स्ये	लप्स्यावहे	लप्स्यामहे

मुद् धातु (प्रसन्न होना)

लट् लकार

प्र० पु०	मोदते	मोदेते	मोदन्ते
म० पु०	मोदसे	मोदेथे	मोदध्वे
उ० पु०	मोदे	मोदावहे	मोदामहे

लङ् लकार

प्र० पु०	अमोदत	अमोदेताम्	अमोदन्त

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

	एकवचन	द्विवचन	बहुवचन
म० पु०	अमोदथाः	अमोदेथाम्	अमोदध्वम्
उ० पु०	अमोदे	अमोदावहि	अमोदामहि

लोट् लकार

प्र० पु०	मोदताम्	मोदेताम्	मोदन्ताम्
म० पु०	मोदस्व	मोदेथाम्	मोदध्वम्
उ० पु०	मोदै	मोदावहै	मोदामहै

विधिलिङ्

प्र० पु०	मोदेत	मोदेयाताम्	मोदेरन्
म० पु०	मोदेथाः	मोदेयाथाम्	मोदेध्वम्
उ० पु०	मोदेय	मोदेवहि	मोदेमहि

लृट् लकार

प्र० पु०	मोदिष्यते	मोदिष्येते	मोदिष्यन्ते
म० पु०	मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे
उ० पु०	मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे

याच् धातु (माँगना)

आत्मनेपद

लट् लकार

प्र० पु०	याचते	याचेते	याचन्ते
म० पु०	याचसे	याचेथे	याचध्वे
उ० पु०	याचे	याचावहे	याचामहे

लङ् लकार

प्र० पु०	अयाचत	अयाचेताम्	अयाचन्त
म० पु०	अयाचथाः	अयाचेथाम्	अयाचध्वम्
उ० पु०	अयाचे	अयाचावहि	अयाचामहि

लोट् लकार

प्र० पु०	याचताम्	याचेताम्	याचन्ताम्
म० पु०	याचस्व	याचेथाम्	याचध्वम्
उ० पु०	याचै	याचावहै	याचामहै

विधिलिङ्

प्र० पु०	याचेत	याचेयाताम्	याचेरन्
म० पु०	याचेथाः	याचेयाथाम्	याचेध्वम्
उ० पु०	याचेय	याचेवहि	याचेमहि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लृट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	याचिष्यते	याचिष्येते	याचिष्यन्ते
म० पु०	याचिष्यसे	याचिष्येथे	याचिष्यध्वे
उ० पु०	याचिष्ये	याचिष्यावहे	याचिष्यामहे

आत्मनेपदी कुछ अन्य प्रसिद्ध धातुएँ :

√ सह् (सहन करना)—सहते, असहत, सहताम्, सहेत, सहिष्यते ।
√ वृत् (होना)—वर्तते, अवर्तत, वर्तताम्, वर्तेत, वर्तिष्यते ।
√ वृध् (बढ़ना)—वर्धते, अवर्धत, वर्धताम्, वर्धेत, वर्धिष्यते ।
√ ईक्ष् (देखना)—ईक्षते, ऐक्षत, ईक्षताम्, ईक्षेत, ईक्षिष्यते ।
√ यत् (यत्न करना)—यतते, अयतत, यतताम्, यतेत, यतिष्यते ।
√ एध् (बढ़ना)—एधते, ऐधत, एधताम्, एधेत, एधिष्यते ।
√ रम् (रमण करना)—रमते, अरमत, रमताम्, रमेत, रंस्यते ।
√ शिक्ष् (सिखाना)—शिक्षते, अशिक्षत, शिक्षताम्, शिक्षेत, शिक्षिष्यते ।
√ शंक् (शंका करना)—शंकते, अशंकत, शंकताम्, शंकेत, शंकिष्यते ।
√ कम् (चाहना)—कामयते, अकामयत, कामयताम्, कामयेत, कामयिष्यते ।
√ त्रै (रक्षा करना)—त्रायते, अत्रायत, त्रायताम्, त्रायेत, त्रास्यते ।
√ शुभ् (शोभा देना)—शोभते, अशोभत, शोभताम्, शोभेत, शोभिष्यते ।
√ रुच् (अच्छा लगना)—रोचते, अरोचत, रोचताम्, रोचेत, रोचिष्यते ।
√ वेप् (काँपना)—वेपते, अवेपत, वेपताम्, वेपेत, वेपिष्यते ।
√ आ+रभ् (शुरू करना)—आरभते, आरभत, आरभताम्, आरभेत, आरप्स्यते ।

भ्वादिगण की उभयपदी धातुएँ :

याच्, नी, हृ, वप्, पच्, वह्, तथा बुध् इत्यादि धातुएँ उभयपदी हैं । इनके रूप परस्मैपद तथा आत्मनेपद दोनों में बनेंगे ।

हृ (हरना), उभयपदी

परस्मैपद

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	हरति	हरतः	हरन्ति
म० पु०	हरसि	हरथः	हरथ
उ० पु०	हरामि	हरावः	हरामः

लङ् लकार

प्र० पु०	अहरत्	अहरताम्	अहरन्
म० पु०	अहरः	अहरतम्	अहरत
उ० पु०	अहरम्	अहराव	अहराम

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	हरतु	हरताम्	हरन्तु
म० पु०	हर	हरतम्	हरत
उ० पु०	हराणि	हराव	हराम

विधिलिङ्

प्र० पु०	हरेत्	हरेताम्	हरेयुः
म० पु०	हरेः	हरेतम्	हरेत
उ० पु०	हरेयम्	हरेव	हरेम

लृट् लकार

प्र० पु०	हरिष्यति	हरिष्यतः	हरिष्यन्ति
म० पु०	हरिष्यसि	हरिष्यथः	हरिष्यथ
उ० पु०	हरिष्यामि	हरिष्यावः	हरिष्यामः

हृ (हरना), उभयपदी

आत्मनेपद

लट् लकार

प्र० पु०	हरते	हरेते	हरन्ते
म० पु०	हरसे	हरेथे	हरध्वे
उ० पु०	हरे	हरावहे	हरामहे

लङ् लकार

प्र० पु०	अहरत	अहरेताम्	अहरन्त
म० पु०	अहरथाः	अहरेथाम्	अहरध्वम्
उ० पु०	अहरे	अहरावहि	अहरामहि

लोट् लकार

प्र० पु०	हरताम्	हरेताम्	हरन्ताम्
म० पु०	हरस्व	हरेथाम्	हरध्वम्
उ० पु०	हरै	हरावहै	हरामहै

विधिलिङ्

प्र० पु०	हरेत	हरेयाताम्	हरेरन्
म० पु०	हरेथः	हरेयाथाम्	हरेध्वम्
उ० पु०	हरेय	हरेवहि	हरेमहि

लृट् लकार

प्र० पु०	हरिष्यते	हरिष्येते	हरिष्यन्ते
म० पु०	हरिष्यसे	हरिष्येथे	हरिष्यध्वे
उ० पु०	हरिष्ये	हरिष्यावहे	हरिष्यामहे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याच् धातु (माँगना)—**परस्मैपद**

याचति, अयाचत्, याचतु, याचेत, याचिष्यति।

याच् धातु (माँगना)—**आत्मनेपद**

याचते, अयाचत, याचताम्, याचेत, याचिष्यते।

नी धातु (ले जाना)—**परस्मैपद**

नयति, अनयत, नयतु, नयेत्, नेष्यति।

नी धातु (ले जाना)—**आत्मनेपद**

नयते, अनयत, नयताम्, नयेत, नेष्यते।

हृ धातु (हरना)—**परस्मैपद**

हरति, अहरत्, हरतु, हरेत्, हरिष्यति।

हृ धातु (हरना)—**आत्मनेपद**

हरते, अहरत, हरताम्, हरेत, हरिष्यते।

वप् धातु (बोना)—**परस्मैपद**

वपति, अवपत्, वपतु, वपेत्, वप्स्यति।

वप् धातु (बोना)—**आत्मनेपद**

वपते, अवपत, वपताम्, वपेत, वप्स्यते।

पच् धातु (पकाना)—**परस्मैपद**

पचति, अपचत्, पचतु, पचेत्, पक्ष्यति।

पच् धातु (पकाना)—**आत्मनेपद**

पचते, अपचत्, पचताम्, पचेत, पक्ष्यते।

वह् धातु (ले जाना)—**परस्मैपद**

वहति, अवहत्, वहतु, वहेत्, वक्ष्यति।

वह् धातु (ले जाना)—**आत्मनेपद**

वहते, अवहत, वहताम्, वहेत, वक्ष्यते।

बुध् धातु (जानना)—**परस्मैपद**

बोधति, अबोधत्, बोधतु, बोधेत्, बोधिष्यति।

बुध् धातु (जानना)—**आत्मनेपद**

बोधते, अबोधत्, बोधताम्, बोधेत, बोधिष्यते।

भज् (भजन करना—भजति-ते), यज् (यज्ञ करना—यजति-ते), धृ (धारण करना—धरति-ते), भृ (भरण करना—भरति-ते) आदि भी उभयपदी धातुएँ हैं।

भ्वादिगण के धातु-रूपों का वाक्य प्रयोग :

लट् लकार

सः पुस्तकं पठति (वह पुस्तक पढ़ता है)।

तौ जलं पिबतः (वे दो जल पीते हैं)।

ते गृहं गच्छन्ति (वे घर जाते हैं)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

त्वं वने तिष्ठसि (तू वन में ठहरता है)।
युवां धनिकं धनं याचथः-याचेथे (तुम दोनों धनी से धन माँगते हो)।
यूयं चन्द्रं पश्यथ (तुम चन्द्रमा को देखते हो)।
अहं मातुः स्मरामि (मैं माता जी का स्मरण करता हूँ)।
आवाम् यानं नयावः-नयावहे (हम दोनों यान को ले जाते हैं)।
किं वयं विद्यां हरामः-हरामहे (क्या हम विद्या को चुराते हैं) ?

लङ् लकार

रामः पुष्पम् अजिघ्रत् (राम ने फूल सूँघा)।
तौ राजानम् असेवेताम् (उन दोनों ने राजा की सेवा की)।
बालकाः बीजम् अवपन्-अवपन्त (बालकों ने बीज बोया)।
त्वं रामायणम् अपठः (तुमने रामायण पढ़ी)।
युवां दुग्धम् अपिबतम् (तुम दो ने दूध पीया)।
यूयं विद्यालयम् अगच्छत (तुम विद्यालय में गए)।
अहं दिल्ली नगरे अतिष्ठम् (मैं दिल्ली नगर में ठहर गया)।
आवां भिक्षां न अयाचाव (हम दो ने भिक्षा नहीं माँगी)।
वयं समुद्रं न अपश्याम (हमने समुद्र नहीं देखा)।
सः जलं न अस्पृशत् (उसने जल को नहीं छुआ)।

लोट् लकार

भक्तः देवस्य स्मरतु (भक्त देवता का स्मरण करे)।
पितरौ बालकं नयताम् (माता-पिता बालक को ले जावें)।
चौराः धनानि न हरन्तु (चोर धन न चुरायें)।
त्वं गीतां पठ (तू गीता पढ़)।
युवाम् अमृतं पिबतम् (तुम दोनों अमृत को पीओ)।
यूयम् उपवनं गच्छत (तुम बाग में जाओ)।
अहं कारागृहे तिष्ठानि (मैं कारागृह में ठहरूँ)।
आवां जलं याचाव (हम दोनो जल माँगें)।
वयं चल-चित्रं पश्याम (हम सिनेमा देखें)।

विधिलिङ्

सः राजानं सेवेत (वह राजा की सेवा करे)।
तौ कष्टं सहेयाताम् (वे दोनों कष्ट सहन करें)।
ते मोक्षं लभेरन् (वे मोक्ष प्राप्त करें)।
त्वम् अधुना मोदस्व (तुम अब प्रसन्न हो जाओ)।
युवां भारं वहेतम्-वहेयाथाम् (तुम दोनों को भार उठाना चाहिए)।
यूयं भोजनं पचेत-पचेध्वम् (तुम्हें भोजन पकाना चाहिए)।
अहं शास्त्रं पठेयम् (मैं शास्त्र पढ़ूँ)।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आवां सुखिनौ भवेव (हम दोनों सुखी होवें)।
वयं शतं शरद: जीवेम (हम सौ वर्ष जीवें)।

लृट् लकार

तावत् रामायणकथा प्रचरिष्यति (तब तक रामायण कथा चलती रहेगी)।
इमौ बालकौ त्वाम् उपहसिष्यत: (ये दो बालक तुम्हारा उपहास करेंगे)।
यावत् गिरय: स्थास्यन्ति (जब तक पर्वत स्थिर रहेंगे)।
त्वं सर्वं बोधिष्यसि-से (तुम सब जान लोगे)।
युवां शीघ्रं वर्धिष्येथे (तुम दोनों जल्दी बढ़ोगे)।
यूयं किं खादिष्यथ (तुम क्या खाओगे) ?
अहं त्वां रक्षिष्यामि (मैं तुम्हारी रक्षा करूँगा)।
आवां कन्दुकेन क्रीडिष्याव: (हम दोनों गेंद से खेलेंगे)।
वयं प्रपञ्चं शीघ्रं त्यक्ष्याम: (हम प्रपञ्च को शीघ्र छोड़ देंगे)।
जना: गृहं गमिष्यन्ति (लोग घर जायेंगे)।
त्वं जलं पास्यसि (तुम जल पीओगे)।
ते पुस्तकं पठिष्यन्ति (वे पुस्तक पढ़ेंगे)।
चौरा: धनं लप्स्यन्ते (चोर धन प्राप्त करेंगे)।
भटा: शत्रून् हनिष्यन्ति (सैनिक शत्रुओं को मारेंगे)।

—o—

अदादिगण

अस् धातु (होना)

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अस्ति (वह है)	स्त: (वे दो हैं)	सन्ति (वे सब हैं)
म० पु०	असि (तू है)	स्थ: (तुम दो हो)	स्थ (तुम सब हो)
उ० पु०	अस्मि (मैं हूं)	स्व: (हम दो हैं)	स्म: (हम दो हैं)

लङ् लकार

प्र० पु०	आसीत् (वह था)	आस्ताम् (वे दो थे)	आसन् (वे सब थे)
म० पु०	आसी: (तू था)	आस्तम् (तुम दो थे)	आस्त (तुम सब थे)
उ० पु०	आसम् (मैं था)	आस्व (हम दो थे)	आस्म (हम सब थे)

लोट् लकार

प्र० पु०	अस्तु (वह हो)	स्ताम् (वे दो होवें)	सन्तु (वे सब हों)
म० पु०	एधि (तू हो)	स्तम् (तुम दो हो)	स्त (तुम सब हो)
उ० पु०	असानि (मैं होऊं)	असाव (हम दो होवें)	असाम (हम सब होवें)

Funding by IKS-MoE

विधिलिङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	स्यात् (वह होवे)	स्याताम् (वे दो होवें)	स्युः (वे सब होवें)
म० पु०	स्याः (तू होवे)	स्यातम् (तुम दो होवो)	स्यात (तुम सब होवो)
उ० पु०	स्याम् (मैं होऊँ)	स्याव (हम दो होवें)	स्याम (हम सब होवें)

लृट् लकार

प्र० पु०	भविष्यति (वह होगा)	भविष्यतः (वे दो होंगे)	भविष्यन्ति (वे सब होंगे)
म० पु०	भविष्यसि (तू होगा)	भविष्यथः (तुम दो होंगे)	भविष्यथ (तुम सब होंगे)
उ० पु०	भविष्यामि (मैं होऊँगा)	भविष्यावः (हम दो होवेंगे)	भविष्यामः (हम सब होवेंगे)

अस् धातु के रूपों का वाक्य प्रयोग :

लट् लकार

अस्ति कश्चिद् वाग्विशेषः (क्या कोई विशेष बात है) ?
राजकुमारौ उटजे न स्तः (दोनों राजकुमार उटज में नहीं हैं) ।
अद्यत्वे ग्रहाः मंगलप्रदाः न सन्ति (आजकल ग्रह मंगलदायक नहीं हैं) ।
शिशुरसि खलु त्वम् (तुम निश्चय ही शिशु हो) ।
युवां स्वस्थौ न स्थः (तुम दोनों स्वस्थ नहीं हो) ।
यूयं नेतारः स्थ (तुम नेता लोग हो) ।
अहं बद्धपरिकरः अस्मि (मैं कटिबद्ध हूँ) ।
आवां तेजस्विनौ स्वः (हम दोनों तेजस्वी हैं) ।
वयं धनरहिताः स्मः (हम धनरहित हैं) ।

लङ् लकार

दशरथः अयोध्यायाः राजा आसीत् (दशरथ अयोध्या का राजा था) ।
बालकौ युद्धनिपुणौ आस्ताम् (दोनों बालक युद्ध-निपुण थे) ।
सैनिकाः दृप्ताः आसन् (सैनिक गर्वयुक्त थे) ।
त्वं क्रुद्धः आसीः (तुम क्रुद्ध थे) ।
युवां शान्तौ आस्तम् (दोनों शान्त थे) ।
यूयं विद्वांसः आस्त (तुम सब विद्वान् थे) ।
अहं कार्यरतः आसम् (मैं काम में लगा था) ।
आवां गृहे आस्व (हम दोनों घर में थे) ।
वयं विद्यालये आस्म (हम विद्यालय में थे) ।

लोट् लकार

अद्य एव मरणमस्तु युगान्तरे वा (आज ही मृत्यु हो या युगान्तर में) ।
सुखदुःखे समाने स्ताम् (सुख और दुःख समान हों) ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेघाः जलप्रदाः सन्तु (मेघ जल देने वाले हों)।
त्वम् आज्ञाकारी एधि (तुम आज्ञाकारी बनो)।
युवाम् उद्योगिनौ स्तम् (तुम दोनों उद्योगी बनो)।
यूयं मेधाविनः स्त (तुम सब मेधावी बनो)।
अहं सर्वकार्येषु प्रथमः असानि (मैं सब कामों में प्रथम होऊँ)।
आवाम् मातृभक्तौ असाव (हम दो मातृ-भक्त बनें)।
वयं राष्ट्रसेवकाः असाम (हम सब राष्ट्र-सेवक बनें)।

विधिलिङ्

सः प्रियदर्शी स्यात् (वह प्रियदर्शी होवे)।
तौ मधुरभाषिणौ स्याताम् (वे दोनों मधुरभाषी होवें)।
ते धनाढ्याः स्युः (वे धनी होवें)।
त्वं परिश्रमी स्याः (तू परिश्रमी हो)।
युवाम् उद्यमिनौ स्यातम् (तुम दोनों उद्यमी होवो)।
यूयं प्रसन्नाः स्यात (तुम्हें प्रसन्न होना चाहिए)।
अहं सुखी स्याम् (मैं सुखी होऊँ)।
आवाम् स्वस्थौ स्याव (हम दोनों स्वस्थ होवें)।
वयं निरामयाः स्याम (हम नीरोग होवें)।

लृट् लकार

सः सफलो भविष्यति (वह सफल होगा)।
तौ कुशलिनौ भविष्यतः (वे दो सकुशल होंगे)।
ते सुखिनो भविष्यन्ति (वे सुखी होंगे)।
त्वम् नीरोगो भविष्यसि (तू नीरोग होगा)।
युवां धार्मिकौ भविष्यथः (तुम दो धार्मिक होंगे)।
यूयं तपस्विनो भविष्यथ (तुम तपस्वी बनोगे)।
अहं पुनः छात्रो भविष्यामि (मैं फिर से छात्र बनूंगा)।
आवाम् अन्तेवासिनौ भविष्यावः (हम दो आश्रमवासी होंगे)।
वयं संन्यासिनो भविष्यामः (हम संन्यासी होंगे)।

हन् (मारना)

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	हन्ति	हतः	घ्नन्ति
म० पु०	हंसि	हथः	हथ
उ० पु०	हन्मि	हन्वः	हन्मः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लङ् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अहन्	अहताम्	अघ्नन्
म० पु०	अहन्	अहतम्	अहत
उ० पु०	अहनम्	अहन्व	अहन्म

लोट् लकार

प्र० पु०	हन्तु	हताम्	घ्नन्तु
म० पु०	जहि	हतम्	हत
उ० पु०	हनानि	हनाव	हनाम

विधिलिङ्

प्र० पु०	हन्यात्	हन्याताम्	हन्युः
म० पु०	हन्याः	हन्यातम्	हन्यात
उ० पु०	हन्याम्	हन्याव	हन्याम

लृट् लकार

प्र० पु०	हनिष्यति	हनिष्यतः	हनिष्यन्ति
म० पु०	हनिष्यसि	हनिष्यथः	हनिष्यथ
उ० पु०	हनिष्यामि	हनिष्यावः	हनिष्यामः

दुह् (दोहना)

लट् लकार

प्र० पु०	दोग्धि	दुग्धः	दुहन्ति
म० पु०	धोक्षि	दुग्धः	दुग्ध
उ० पु०	दोह्मि	दुह्वः	दुह्मः

लङ् लकार

प्र० पु०	अधोक्-ग्	अदुग्धाम्	अदुहन्
म० पु०	,,	अदुग्धम्	अदुग्ध
उ० पु०	अदोहम्	अदुह्व	अदुह्म

लोट् लकार

प्र० पु०	दोग्धु	दुग्धाम्	दुहन्तु
म० पु०	दुग्धि	दुग्धम्	दुग्ध
उ० पु०	दोहानि	दोहाव	दोहाम

विधिलिङ्

प्र० पु०	दुह्यात्	दुह्याताम्	दुह्युः
म० पु०	दुह्याः	दुह्यातम्	दुह्यात
उ० पु०	दुह्याम्	दुह्याव	दुह्याम

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लृट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	धोक्ष्यति	धोक्ष्यतः	धोक्ष्यन्ति
म० पु०	धोक्ष्यसि	धोक्ष्यथः	धोक्ष्यथ
उ० पु०	धोक्ष्यामि	धोक्ष्यावः	धोक्ष्यामः

अदादिगण की अन्य प्रसिद्ध धातुओं के संक्षिप्त रूप—

√ **अद्** (भोजन करना)—अत्ति, आदत्, अत्तु, अद्यात्, अत्स्यति।

√ **विद्** (जानना)—वेत्ति, अवेत्-द्, वेत्तु, विद्यात्, वेदिष्यति।

√ **रुद्** (रोना)—रोदिति, अरोदत्-० दीत्, रोदितु, रुद्यात्, रोदिष्यति।

√ **ब्रू** (बोलना)—ब्रवीति, अब्रवीत्, ब्रवीतु, ब्रूयात्, वक्ष्यति।

√ **जागृ** (जागना)—जागर्ति, अजागः, जागर्तु, जागृयात्, जागरिष्यति।

√ **शास्** (शासन या उपदेश करना)—शास्ति, अशात्-द्, शास्तु, शिष्यात्, शासिष्यति।

√ **स्वप्** (सोना)—स्वपिति, अस्वपीत्-अस्वपत्, स्वपितु, स्वप्यात्, स्वप्स्यति।

√ **इ** (जाना)—एति, ऐत्, एतु, इयात्, एष्यति।

√ **स्तु** (स्तुति करना)—स्तौति, अस्तौत्, स्तौतु, स्तुयात्, स्तोष्यति।

अधि √ इ (अध्ययन करना)—अधीते, अध्यैत, अधीताम्, अधीयीत, अध्येष्यते।

√ **आस्** (बैठना)—आस्ते, आस्त, आस्ताम्, आसीत्, आसिष्यते।

√ **शी** (सोना)—शेते, अशेत, शेताम्, शयीत, शयिष्यते।

अदादिगण के धातु-रूपों का वाक्य प्रयोग—

हन्—सः शत्रुं हन्ति, अहन्, हन्तु, हन्यात्, हनिष्यति इत्यादि।

दुह्—सः गां पयः दोग्धि, अधोक्, दोग्धु, दुह्यात्, धोक्ष्यति इत्यादि।

—०—

जुहोत्यादिगण (धातु को द्वित्व)

दा धातु (देना), उभयपदी

परस्मैपद

लट् लकार—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	ददाति	दत्तः	ददति
म० पु०	ददासि	दत्थः	दत्थ
उ० पु०	ददामि	दद्वः	दद्मः

लङ् लकार—भूतकाल

प्र० पु०	अददात्	अदत्ताम्	अददुः
म० पु०	अददाः	अदत्तम्	अदत्त
उ० पु०	अददाम्	अदद्व	अदद्म

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लोट् लकार—आज्ञार्थे

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	ददातु	दत्ताम्	ददतु
म० पु०	देहि	दत्तम्	दत्त
उ० पु०	ददानि	ददाव	दद्म

विधिलिङ्—विधि, संकेत, सम्भावना

प्र० पु०	दद्यात्	दद्याताम्	दद्युः
म० पु०	दद्याः	दद्याताम्	दद्यात
उ० पु०	दद्याम्	दद्याव	दद्याम

लृट् लकार—भविष्यत्काल

प्र० पु०	दास्यति	दास्यतः	दास्यन्ति
म० पु०	दास्यसि	दास्यथः	दास्यथ
उ० पु०	दास्यामि	दास्यावः	दास्यामः

जुहोत्यादिगण (धातु को द्वित्व)

दा धातु (देना), उभयपदी

आत्मनेपद

लट् लकार—वर्तमानकाल

प्र० पु०	दत्ते	ददाते	ददते
म० पु०	दत्से	ददाथे	दद्ध्वे
उ० पु०	ददे	दद्वहे	दद्महे

लङ् लकार—भूतकाल

प्र० पु०	अदत्त	अददाताम्	अददत
म० पु०	अदत्थाः	अददाथाम्	अदद्ध्वम्
उ० पु०	अददि	अदद्वहि	अदद्महि

लोट् लकार—आज्ञार्थे

प्र० पु०	दत्ताम्	ददाताम्	ददताम्
म० पु०	दत्स्व	ददाथाम्	दद्ध्वम्
उ० पु०	ददै	ददावहै	ददामहै

विधिलिङ्—विधि, संकेत, सम्भावना

प्र० पु०	ददीत	ददीयाताम्	ददीरन्
म० पु०	ददीथाः	ददीयाथाम्	ददीध्वम्
उ० पु०	ददीय	ददीवहि	ददीमहि

लृट् लकार—भविष्यत्काल

प्र० पु०	दास्यते	दास्येते	दास्यन्ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	एकवचन	द्विवचन	बहुवचन
म० पु०	दास्यसे	दास्येथे	दास्यध्वे
उ० पु०	दास्ये	दास्यावहे	दास्यामहे

जुहोत्यादिगण की अन्य प्रसिद्ध धातुओं के संक्षिप्त रूप :

हु (हवन करना)—जुहोति, अजुहोत्, जुहोतु, जुहुयात्, होष्यति ।

भी (डरना)—बिभेति, अबिभेत्, बिभेतु, बिभीयात्, भेष्यति ।

भृ (भरना)—बिभर्ति, अबिभः, बिभर्तु, बिभृयात्, भरिष्यति ।

जुहोत्यादिगण के धातु रूपों का वाक्यों में प्रयोग :

सः याचकाय भोजनं ददाति (वह याचक को भोजन देता है) ।

ऋषिः प्राणान् अग्नौ अजुहोत् (ऋषि ने प्राणों को अग्नि में हवन कर डाला) ।

यः भेष्यति सः मरिष्यति (जो डरेगा, वह मरेगा) ।

अद्यत्वे सर्वः निजोदरं बिभर्ति (आजकल हर कोई अपना पेट भरता है) ।

—०—

दिवादिगण

दिव्>दीव् (जुआ खेलना, चमकना)

लट् लकार

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	दीव्यति	दीव्यतः	दीव्यन्ति
म० पु०	दीव्यसि	दीव्यथः	दीव्यथ
उ० पु०	दीव्यामि	दीव्यावः	दीव्यामः

लङ् लकार

प्र० पु०	अदीव्यत्	अदीव्यताम्	अदीव्यन्
म० पु०	अदीव्यः	अदीव्यतम्	अदीव्यत
उ० पु०	अदीव्यम्	अदीव्याव	अदीव्याम

लोट् लकार

प्र० पु०	दीव्यतु	दीव्यताम्	दीव्यन्तु
म० पु०	दीव्य	दीव्यतम्	दीव्यत
उ० पु०	दीव्यानि	दीव्याव	दीव्याम

विधिलिङ्

प्र० पु०	दीव्येत्	दीव्येताम्	दीव्येयुः
म० पु०	दीव्येः	दीव्येतम्	दीव्येत
उ० पु०	दीव्येयम्	दीव्येव	दीव्येम

लृट् लकार

प्र० पु०	देविष्यति	देविष्यतः	देविष्यन्ति

Funding by IKS-MoE

	एकवचन	द्विवचन	बहुवचन
म० पु०	देविष्यसि	देविष्यथः	देविष्यथ
उ० पु०	देविष्यामि	देविष्यावः	देविष्यामः

नृत् (नाचना)

लट् लकार

प्र० पु०	नृत्यति	नृत्यतः	नृत्यन्ति
म० पु०	नृत्यसि	नृत्यथः	नृत्यथ
उ० पु०	नृत्यामि	नृत्यावः	नृत्यामः

लङ् लकार

विषय-निरूपण के साथ-साथ निजी भावों के प्रदर्शन के लिए पत्र-लेखन एक सशक्त माध्यम है। संस्कृत में पत्र-लेखन की अति प्राचीन परम्परा है। प्राचीन शैली के पत्र आधुनिक शैली के पत्रों से सर्वथा भिन्न होते थे। प्राचीन शैली के पत्रों का प्रारम्भ प्रायः 'स्वस्ति' शब्द से होता था। तदुपरान्त जहाँ से पत्र लिखा गया है, जिसने पत्र लिखा है, जहाँ पर पत्र भेजना है तथा जिसको पत्र लिखना है—इन सब बातों का एक ही वाक्य में उल्लेख रहता था। जैसे—कुरुक्षेत्र के देवेन्द्रमोहन दिल्ली निवासी अपने पुत्र सुरेन्द्रमोहन को पत्र लिखेंगे तो उसका प्रारम्भ इस प्रकार रहेगा—

स्वस्ति। कुरुक्षेत्रात् दिल्लीनगरनिवासिनं चिरंजीविनम् आयुष्मन्तं सुरेन्द्रमोहनं देवेन्द्रमोहनः सस्नेहमाशीःसहस्रपूर्वकं वार्तयति यथा—

तदुपरान्त पत्र का विषयकथन होता था। अन्त में इति शब्द से पत्र को समाप्त कर दिया जाता था।

किन्तु आजकल हिन्दी व अंग्रेजी के पत्रों की भाँति ही संस्कृत के पत्रों को लिखा जाने लगा है। इसमें निम्नलिखित बातों का व्यवहार होता है—

(1) सर्वप्रथम कागज के दाहिनी ओर स्थान तथा उसके नीचे तिथि का निर्देश होता है। जैसे—चण्डीगढ़ात्, रामपुरतः, लक्ष्मणपुरतः, हरिद्वारात्।
20-1-85 18-2-85 1-3-85 5-2-85

अब तो हिन्दी के समान ही अपना पूर्ण पता इस स्थान पर लिखने की परम्परा संस्कृत में भी हो गई है। जैसे—

113, नवयुवकछात्रावास,
हिन्दूकॉलेज,
सोनीपतनगरात्।
5-1-1985

इत्यादि।

(2) तदनन्तर पत्र के बाईं ओर जिसको पत्र लिखा जाता है उसे सम्बोधन करते हुए नमस्ते, नमस्कारः, प्रणामः, स्वस्ति आदि लिखे जाते हैं। जैसे—

पुत्र के लिए—
प्रिय पुत्र सुरेश !
शतं शुभानि भूयांसु:
अथवा सस्नेहमाशीः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छोटे भाई को—

प्रियभ्रातृवर मानो !

सस्नेहं नमः ।

मित्र को—

प्रिय मित्र रमेश !

अथवा प्रिय सुहृद् रमेश !

सस्नेहं नमस्ते ।

पूज्य पिता को—

श्रीमतां भवतां पितृवर्याणां

चरणारविन्देषु सादरं प्रणामाः ।

पूज्यपादपितः !

सादरं भूयोभूयो नमोनमः ।

प्रधानाचार्य आदि का पूरा परिचय लिखकर नीचे 'मान्यवर !' सविनयं निवेद्यते···· से प्रार्थना-पत्र प्रारम्भ कर दिया जाता है। व्यावहारिक (व्यापारी) पत्रों में 'श्रीमन् !' से सम्बोधन करके पत्र का विषय प्रारम्भ कर दिया जाता है। विषयकथन के बाद अन्त में भवदीयः, भावत्कः आदि शब्दों के साथ अपना नाम लिखना होता है। जैसे—

पिता पुत्र के लिए—त्वदीयः शुभचिन्तकः

पुत्र पिता के लिए—भवदाज्ञाकारी सूनुः

मित्र मित्र के लिए—भवद्बन्धुः, स्नेहांकितः

भगिनी भाई के लिए—भवदीया स्नेहाधीना भगिनी ।

प्रधानाचार्य आदि के लिए—श्रीमतामाज्ञाकारी शिष्यः। श्रीमतां वशंवदः।

प्रकाशक आदि के लिए—भवदीयः या भवदीया ।

व्यावहारिक पत्रों में पत्र की समाप्ति पर बाईं ओर तिथि लिख दी जाती है।

पत्र में प्रायः पचास शब्द होने चाहियें। आठ-दस वाक्यों में विषयपूर्ण हो जाना चाहिए ।

1. (विषयः—छात्रावासजीवनविषये पुत्रस्य पितरं प्रति पत्रम्)

स्थाननाम·········।

तिथिः·········

पूजनीयपाद पितः !

सादरं भूयोभूयो नमोनमः ।

अहं गृहात् प्रस्थाय देहलीमध्ये यानात् अवतीर्य रिक्शायानेन छात्रावासं सुखेन प्राप्तः । छात्रावासस्य पर्यवेक्षकः स्वकक्षे एव आसीत् अतस्तस्य निर्देशेन मया स्वावासकक्षं लब्धम् । तत्र सर्वाणि वस्तूनि यथावत् मन्दं मन्दं निवेश्य अहं विगत-चिन्तो जातः । अस्मिन् कक्षे वायोः प्रकाशस्य च कृते चत्वारि वातायनानि तिष्ठन्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
Saurabh Rastogi

मया भित्तिषु महापुरुषाणां चित्राणि प्रतिलम्ब्य कक्षं शोभान्वितम् कृतम्। अत्र पानाशनयोः सुप्रबन्धः। प्रांगणे वयस्यैः समं यदाकदाचित् स्थित्वा गोष्ठीसुखम् अनुभवामि। वयं कदाचित् गेयपदानि गायन्तः, शिष्ट-हास्यपरमभिनयं कुर्वन्तः, अन्योन्यं सुखयन्तः सुखेन कालम् अतिवाहयामः। तत्रभवता मम मनाग् अपि चिन्ता न कार्या।

मातृपादयोः प्रणामः, भ्रातॄणां भगिनीनां च कृते सस्नेहसंश्लेषः। अस्तु।

भवदीयो विनतो बालः,

बलवीरः।

2. (विषयः—स्वविद्यालयस्य वार्षिकोत्सववर्णनपरं पत्रं मित्रस्य मित्रं प्रति)

छात्रावासः.........।

तिथिः.........

प्रियमित्र देव !

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु। तव पत्रं लब्धम् आसीत्। परं निजविद्यालयस्य वार्षिकोत्सवे अहं रममाण आसम्। इदानीं तत् सम्पन्नम्। तस्य च विवरणम् तव प्रसादाय लिखामि। तस्मिन् अवसरे वधूरिव अस्माकं विद्यालयः भूषितः। इतस्ततः मार्गेषु विवर्णा ध्वजा एव ध्वजाः दोधूयन्ते स्म। सर्वत्र चाकचक्यम् आसीत्। अध्यक्ष-महोदयस्य तुमुलैः शंखध्वनिभिः, विगुलवैण्डवाद्यैश्च स्वागतम् अभूत्। स च मालाभिः भृतः। वार्षिकोत्सवावसरे क्रियमाणे हवने तेन सादरं आहुतिः अर्पिता। तस्मिन् मण्डपं प्राप्ते सर्वे सभ्याः प्रत्युत्थिताः। वेदि-स्थानात् बालैः सस्वरं समवेता एका स्वागत-गीतिका गीता। वीररसाचिता एका कविता एकया कन्यया पठिता। डिण्डिमशब्देन समम् एकम् आकर्षकं नृत्यं जातम्। हास्यरसोद्भावकम् एकं रूपकम् अभिनीतं जातम्। प्राचार्येण विद्यालयविवरणं प्रस्तुतम्। अध्यक्षमहोदयेन कलासु प्रवीणेभ्यः क्रीडासु च सुस्थितिवद्भ्यो बालेभ्यः विविधानि पारितोषिकानि वितीर्णानि, पञ्चसहस्रमितं च धनं दानरूपेण दत्तम्। विद्यालयप्रधानेन तं प्रति निजं कार्तज्ञम् प्रकटितम्। ततश्च समुचितजलपानोर्ध्वं सर्वं सुसम्पन्नं जातम्। लोकश्च प्रसन्नः स्वां स्वां दिशाम् अभ्ययात्। अस्तु।

गृहे सर्वेभ्यो मम प्रणामाः।

सस्नेहो भवन्मित्रम्,

धर्मपालः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3. (विषय--पुस्तकप्रेषणार्थं पुस्तकप्रकाशकं प्रति पत्रम्)

26, गीता-छात्रावासः,
पटेलमार्गः,
नवदिल्ली।
तिथिः.........

श्री लक्ष्मी पब्लिकेशंज,
बारादरी, देहली।

श्रीमन् !

नमस्कारः।

सेवायाम् इदं निवेदनं यत् अहम् अधस्तनानि कानिचित् पुस्तकानि क्रेतुं इच्छामि यानि मन्ये भवत्सकाशात् सुलभानि। कृपया भवता तानि यथानिर्देशं मम सविधे अचिरात् प्रदेयशुल्कपारशलद्वारेण (वी० पी० पी०) प्रेषणीयानि।

पुस्तकनाम	लेखकनाम	प्रति
1. संस्कृत-व्याकरणम्	डा० परमानन्दगुप्तः	एका
2. भोजप्रबन्धः	डा० परमानन्दगुप्तः	एका
3. अनुवाद-रचना	प्रा० वेदप्रकाश वेदालंकारः	एका
4. अलंकारसर्वस्वम्	प्रा० वेदप्रकाशः	एका

पूर्वतः सधन्यवादम्,

भवदीयो विश्वस्तः,
धर्मप्रकाशः।

4. (विषयः—प्राचार्यमहोदयाय अनुपस्थितिवशात् क्षमायाचनापत्रम्)

श्री प्राचार्यमहोदयः,
गीता उच्चतर विद्यालयः,
कुरुक्षेत्रम्।

श्रीमन् !

अहं गते सप्ताहे पञ्चमतिथौ गृहस्य अनिवार्यकार्यवशात् विद्यालयात् अवकाशम् अनादाय अनुपस्थित आसम्। तेनाऽहं द्विरूप्यकशुल्कदण्डेन दण्डितोऽस्मि। अहं कदापि विनाऽवकाशम् अनुपस्थितो न तिष्ठामि। अयं प्रथम एवावसरः। तस्मात् कृपया तस्मिन् दिने मम अनुपस्थितिः भवता क्षन्तव्या इति निवेदनम्।

भवदीयः शिष्यः,
वेदपालः,
अष्टमी कक्षा,
(क्रमांकः—20)।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

5. (विषयः—"राष्ट्रीयं प्रेम जीवन-सर्वस्वम्" इत्यधिकृत्य विदेशगतं मित्रं प्रति पत्रम्)

दयानन्दद्वारः,
अजमेर।
तिथिः.........

प्रिय मित्र रमाकान्त !

सप्रेम नमोनमः।

तव कुशलपत्रं प्राप्तम्। धन्यवादः।

तत्र अमेरिका इति नाम्नि विदेशे स्थितत्वाऽपि त्वया अन्यैः भारतीयैः सह संघटनां कृत्वा समयात् समयं गोष्ठीक्रियते इति वृत्तं अति सुखावहम्। मित्र! यत्र देशे जन्म गृहीतम्, यत्र शैशवं यापितम्, यत्र धूलौ बाल्यसुलभाः लीलाः कृताः यत्र तारुण्यं प्राप्तम्, यत्र विद्याज्ञानकणैः आत्मा संवर्धितः तया स्वदेशभूम्या सह अनुरागः सत्यं जीवनसर्वस्वम्। तस्याः कणैरनुरागोपचयः स्वाभाविकः। तस्या राष्ट्रियैः सह अव्याजं प्रेम स्वतः सिद्धम्। यथा यथा च नरः स्वदेशात् दूरतरं याति तथा तथा तस्य तद्देशीयैः सह प्रच्छन्नरागः स्फुटतरो भवति। रागात् मनुष्यः अवशो जायते। तद् युक्तमेव युष्माकं तत्र समिति कृत्वा उपस्थानम्। निजराष्ट्रस्य निष्ठापूर्वकं गुणगानञ्च। अयं राग एव जीवनसर्वस्वम्। अनेन कियान् सन्तोषो जायते इति को नाम वर्णयेत्? अस्तु, युष्माकं शुभम् इच्छन्।

भवदीयं प्रियमित्रं,
अनुरागः।

6. (विषयः—पितृनिधनात् मित्रं प्रति मित्रस्य पत्रम्)

छात्रावासः।
तिथि.........

प्रिय मित्र सुरेश !

सप्रेम नमोनमः।

मान्यस्य तव पितृपादस्य निधनविषयकं पत्रम् उपगतम्। तत् पठित्वा यो मयि वज्रपात इवाऽभूत् तस्य का कथा! न जाने त्वया कथमिव हृदये पाषाणं निधाय तद् वृत्तं स्वहस्तेन अंकितं स्यात्। मित्र! सत्यं, अपूर्वेयं घटना। इदानीमपि स ते पितृपादः मम चक्षुषोरग्रे तिष्ठतीव, चलतीव, वदतीव, वात्सल्यञ्च प्रदर्शयतीव इति कथमहं "स स्वर्गतः" इति विश्वासं कुर्याम्। परं "सत्यं गतः" इति मत्वा निर्दयो विप्रयोगः सर्वथा सोढव्य एव। का गतिः! भवन्मातुः साम्प्रतं या दशा स्यात् तां को नाम वर्णयितुं पारयेत्! शिशूनां क्रन्दनं कस्य न हृदयं क्रकच इव विदारयेत्! निर्दयं हि दैवम्। परम् अत्र का गतिः! आत्मानमपि अन्यांश्चापि समाश्वासय। यानि पितृपादस्य अनवद्यानि कर्माणि तानि अनुसर, कर्त्तव्यमुखश्च तिष्ठ। प्रलापैः रोदनैश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किं सिध्यति ? भगवान् तस्मै सद्गतिं दद्यात् युष्मभ्यञ्च दुःखसहनक्षमताम् । मित्र ! अहम् अचिरादेव त्वां द्रक्ष्यामि । अस्तु ।

शोकोपहतो भवन्मित्रम्,
घर्मव्रतः ।

7. (विषयः—दीपमालाविषये मित्रं प्रति पत्रम्)

केशवनिकेतनम्,
यमुनानगरम् ।
तिथिः·········

प्रियमित्र दिनेश !

सप्रेम नमोनमः ।

तव मधुरं पत्रं लब्धम् आसीत् । ततो दीपमालापर्व उपस्थितम् । इदानीं त्वां दीपमालाविषये लिखामि । मित्र ! कुटुम्बमध्ये स्थित्वा मया सहर्षं दीपमाला मानिता । अस्माकं गृहस्य अन्तः बहिश्च प्रकाशस्य पुञ्ज एव पुञ्ज उद्गतः आसीत् । क्वचिद् वलभा (बल्ब) एव वलभा विविधरूपा विविधाकाराश्च, क्वचिन् मोमवर्त्तिका एव मोमवर्त्तिकाः सामान्याश्च सुगन्धापूर्णाश्च, क्वचित् तैलदीपा एव तैलदीपाः क्वचिच्च गर्भधाः एव गर्भधाः (गरबड़े) इति काचन अपूर्वा एव प्रकाश-सम्पत् पर्यभिलक्षिताऽभवत् । वीथीमध्ये बहुविधानां स्फोटानां विस्फोटनम् महत् कुतुहलम् अजनयत् । बमरूपा विस्फोटास्तु भीतिं प्रसारयन्तः रणोत्सवमिव प्रथयन्ति स्म । अमावस्यारात्रीः प्रकाशरात्रिरिव अदृश्यत् । विविधानि मिष्टान्नानि स्वयम् अपि अस्माभिः यथाकामं खादितानि, वत्सलानां मित्राणां गृहेषु च परिवेषितानि । श्रीमतो रामचन्द्रस्य अयोध्यानिवर्त्तने प्रारब्धा इयं दीपमाला अद्यापि हिन्दुगृहेषु अपूर्वेण उत्साहेन मान्यते इति कोऽत्र संशयः । मन्ये भवताऽपि ससमारोहं दीपमाला परिजनैः सह मानिता भवेत् । मित्र ! इयं दीपमाला युष्माकं सर्वेषां हिताय कल्पेत । अस्तु ।

पत्रोत्तरं देयम् ।

सस्नेहो भवन्मित्रम्,
आलोककुमारः ।

8. (विषयः—पितुः पदोन्नतिकारणात् पत्रं मित्रं प्रति)

60, अलकापुरी,
लक्ष्मणपुरम् ।
तिथिः·········

प्रिय मित्र नरेश !

सप्रेम नमोनमः ।

अत्र कुशलं तत्रास्तु । मित्र ! त्वम् इदं विदित्वा प्रसन्नो भविष्यसि यन् मम पूज्यः पितृमहोदयः महाविद्यालये चिराय सेवाकार्यं कुर्वन् साम्प्रतं तस्यैव प्राचार्यपदं आरोहितः तिष्ठति । पितृमहाभागस्य सुनिष्ठया कृतानां सेवानां कारणात् सानुमत्ता-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(मीनियारिटि), कारणात्, लोकप्रियताकारणात्, स्वशिक्षाविषयस्य परमनैपुण्य-कारणात् च तेन इदं स्पृहणीयं पदं लब्धम् इति सर्वेऽपि प्राध्यापकाः छात्राश्च तत्प्रशंसा-भाजः तिष्ठन्ति। अस्माकं गृहे पर्वकाले इव अनेके जनाः आयान्ति, आशिषश्च आयुष्याय कुर्वन्ति। अयं कालः अस्माकं हर्षस्य पराकाष्ठायाः काल इति न मे वाग् वा लेखनी वा वर्णयितुं समर्था। अस्तु; सर्वेभ्यः सादरं नमोनमः। पत्रोत्तरं देयम्।

भवदीयः प्रियसुहृत्,
प्रकाशदेवः।

9. (विषयः—आचार्याय सद्वृत्तप्रमाणपत्रार्थम् पत्रम्)

6, पटेल नगर,
यमुनानगरम्।
तिथिः.........

मान्य महानुभाव !

सादरं नमोनमः।

सेवायाम् इदं निवेदनं यत् मया अस्मिन् एव वर्षे भवतां विद्यालयात् प्रावेशिकी परीक्षा द्वितीयश्रेण्याम् उत्तीर्णा। मम विद्यालयस्य-क्रमाङ्कः दशम्याः कक्षायाः त्रिंशत् इति अभूत्। मया पादकन्दुकक्रीडायां सदा प्रमुखो भागो गृहीतः। मम आचरणं विशुद्धं लोकप्रियञ्च आसीत्। इदानीम् अहं काञ्चन सेवां लब्धुं यत्नवान् अस्मि। कृपया यथाशीघ्रम् मम सद्वृत्तप्रमाणपत्रं मम परिचयेन प्रेषणीयम्।

सबहुमानम्,

भवदीयः प्रियः शिष्यः,
वासुदेवः।

10. (विषयः—विद्यालयस्य पर्यटनकार्यक्रमे अनुमतिहेतोः पितरं प्रति पत्रम्)

छात्रावासः।
तिथिः.........

पूज्यपाद पितृमहोदय !

सादरं नमोनमः।

अत्र कुशलम् तत्रास्तु। सेवायाम् इदं निवेदनं यत् अग्रिममासे विद्यालयस्य पञ्चदश अनध्यायदिवसेषु पञ्चदशच्छात्राः संभूय पर्वतेषु पर्यटनं कुर्युः इति निश्चितं जातम्। पर्यटनप्रदेशश्च शिवालयस्य (शिमला) पर्वतमण्डलस्थानानि। तत्र पद्भ्याम् एव मुख्यतः पर्यटनं भविष्यति। क्वचित् क्वचित् यानेन चापि। व्ययार्थं मम समीपे पर्याप्तं धनं विद्यते अतः एतदर्थम् अहं तत्रभवताम् अनुमतिं याचे। एको वरिष्ठः प्राध्यापकः अस्माभिः संगतो भविष्यति तेन न काऽपि चिन्ता कार्या। कृपया अनुजानातु तत्रभवान्।

गृहे सर्वेभ्यो नमोनमः।

भवदीयः प्रियस्सुतः,
सत्यप्रकाशः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

11. (विषयः—अध्ययनोपेक्षावशात् कनिष्ठभ्रातरं प्रति पत्रम्)

छात्रावासः।
तिथिः.........

प्रियभानो !

सप्रेम आशिषः।

अत्र कुशलम् तत्रास्तु।

पितृपादस्य पत्रं प्राप्तम्। तेन सहैव विद्यालयात् त्वया ये अंकाः प्राप्ताः तेषां विवरणपत्रम् अपि प्राप्तम्। तत् पठित्वा दुःखं जातम्। तव सर्वेषु अपि विषयेषु हीनाः अंकाः। तत् कथम्? त्वम् अरोगः तिष्ठसि ततोऽपि हीना अंका इति आश्चर्यकरम्। मन्ये त्वं नियमेन न प्रवर्त्तसे, समयञ्च व्यर्थम् अतिवाहयसि। त्वया समयेन एव सर्वं कर्त्तव्यम्। पठनस्य समये पठनं, खेलनस्य समये खेलनं, विश्रामस्य समये विश्रामश्च कर्त्तव्यः। मनसा पठनीयम्। ये पठन्ति ते उच्चैः पदं, सुखं, धनं यशश्च लभन्ते। समयो व्यर्थकार्येषु न नाशनीयः। नियमस्य पालनं सततं कुरु ततः उच्चैः अंकान् प्राप्स्यसि। अस्तु, किंचित् कालोर्ध्वम् अहं पत्रेण सूचनीयः का तव समयपालनात् उन्नतिः इति। आदरणीयाभ्यां पितृभ्यां सप्रेम नमोनमः।

भवदीयो भ्राता,
यज्ञप्रियः।

12. (विषयः—मित्राय विवाहस्य निमन्त्रणपत्रम्)

5, धर्मनगर,
अम्बाला छावनी।
तिथिः.........

प्रियमित्र देश !

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु।

मित्र ! अहम् इदं प्रसन्नतापूर्वकं ज्ञापयामि यत् मम विवाहः अग्रिममासस्य पञ्चम्यां तिथौ निश्चितो जातः। वरयात्रा च इतः अमृतसरं गमिष्यति। अहं त्वां प्रेम्णा पूर्वत एव ज्ञापयामि येन त्वम् अत्र त्रिचतुर्दिनानि पूर्वत एव प्राप्तः स्याः। त्वया अवश्यम् अत्र आगन्तव्यं वर्त्तते। नाऽत्र कस्याऽपि मिषस्य अवकाशो देयः। तव स्निग्धां संगतिं साह्यञ्च अहं कामये।

आदरणीयाभ्यां पितृभ्यां सस्नेहं नमोनमः।

अस्तु, तव पत्रोत्तरं प्रतीक्षमाणः

भवन्मित्रम्,
ध्रुवदेवः।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

13. (विषयः—मैट्रिकपरीक्षोपरान्तं भगिनीं प्रति पत्रम्)

40, रघुनाथपुरी,
यमुनानगरम्।
तिथिः.........

मान्ये भगिनि !

सादरं नमोनमः।

अत्र कुशलं तत्रास्तु।

भवदीयं पत्रम् प्राप्तम्। प्रावेशिकीपरीक्षायां सफलतायां भवद्वर्धापनपत्र-कारणात् अनेके धन्यवादाः। इदानीम् अहं किं कर्त्तुम् इच्छामि इति भवत्या पृष्टं तद् भगिनि ! इदानीम् अहं पठितुं न इच्छामि यतो हि पठित्वाऽपि शीघ्रम् अर्थसिद्धिर्न दृश्यते। निजगृहस्य आर्थिकदशाम् उन्नेतुम् अहम् इच्छामि तच्च कस्यचित् शिल्पस्य शिक्षया ततश्च अभ्यासेन एव सम्भवं, नान्यथा। अहं विद्युत-शिल्पं शिक्षित्वा द्वयोः वर्षयोः उपरान्तं स्वतन्त्र-व्यवसायं कर्तुम् इच्छामि येन शीघ्रं अर्थसिद्धिः स्यात्। आदरणीयस्य पितृपादस्य अपि अत्र सम्मतिः। अस्तु, आवुत्ताय नमोनमः।

ससम्मानं भवद्भ्राता,
धर्मवीरः।

14. (विषयः—विवाहप्रस्तावस्य निषेधाय पित्रे पत्रम्)

10, आनन्दपुर,
सहारनपुर।
तिथि.........

आदणीय पितृमहोदय,

सादरं नमोनमः।

अत्र कुशलं तत्रास्तु।

सेवायाम् इदं निवेदनं यद् भवता निजपत्रे यः विवाहप्रस्तावः मम समक्षं उपस्थापितः स मे न अभिमतः। तत्र कारणञ्च इदम्—स परिवारः धनेन अति सम्पन्नः, न च वयं तथा। तत्र तेषां बहवः सेवकाः ये दिवानिशं तेषां कुटुम्बिनां सेवां कुर्वन्ति। तेन च तत्र लोकः कर्मणि प्रायेण अनभ्यस्तः सुकुमारवृत्तिश्च तिष्ठति। तस्मात् तेषां सा कन्या अपि तादृशी एव भविष्यति। अस्माकं तु श्रमप्रधाने गृहे सर्वेऽपि स्वस्वकर्मणि अभ्यस्ताः, न च तस्मात् कोऽपि तथा सुकुमारवृत्तिः। तत् सा कन्या श्रमप्रधाने अस्माकं गृहे कथमिव चरिष्यति ? तेन ममायं विवाहप्रस्तावो नाभिमतः। मन्ये भवान् इदं युक्तियुक्तम् अस्वीकरणं मंस्यते। अस्तु पूज्यमात्रे नमः। भ्रातृभ्यो भगिनीभ्यश्च स्नेहः।

भवदीयः प्रियः पुत्रः,
बलदेवः।

Funding by IKS-MoE

15. (विषयः—परीक्षाप्रश्नपत्रसाधनविषये पितरं प्रति पत्रम्)

7, उत्तम छात्रावासः,
देहरादून।
तिथिः.........

आदरणीय पितृपाद !

सादरं नमोनमः।

अत्र कुशलम् तत्रास्तु।

पूज्य पितः ! इदानीम् एव सम्पन्नायां नवमश्रेणीपरीक्षायां मया यद् यद् आचरितं तत् तत् भवत्-समक्षं उपन्यस्यामि। मया सावधानतया सज्जा कृता आसीत् तेन मम व्याकुलता न तथा आसीत्। परम् पुनरपि परीक्षाकालः कं न क्षोभयति ! मया संस्कृतस्य पत्रे व्याकरणांशः तु सम्यक् साधितः परं अनुवादांशो न तथा। इंगलिशपत्रे पुस्तकाधारितप्रश्नाः सम्यक् साधिताः, न परं शब्दैः वाक्य-रचना। प्रस्तावः सम्यक् लिखितः। ज्यामितिपत्रे न तथा संतोषः यथा बीजगणित-मध्ये। हिन्दीपत्रे सर्वं सम्यक् साधितम्। स्यान्नाम किंचित् अहं द्वितीयश्रेणीं प्राप्स्यामि इति मे मनः करोति। अस्तु, भवता चिन्ता न कार्या। अहम् अधिकतरं श्रमं पठने करिष्यामि।

आदरणीयायै मात्रे नमः। बालेभ्यः स्नेहः।

भवदीयः प्रियपुत्रः,
धर्मपालः।

16. (विषयः—कालघटिकां जन्मदिनोत्सवे लब्ध्वा पितृव्यं प्रति पत्रम्)

9, छात्रावासः,
भरतपुर।
तिथिः.........

आदरणीय पितृव्य,

सादरं नमोनमः।

अत्र कुशलं तत्रास्तु।

मम जन्मदिनोत्सवे भवद्भिः सर्वैरपि यः हर्षप्रकर्षः प्रकटितः तं स्मृत्वा स्मृत्वा अहम् अति सुखी भवामि। भवता मम कृते कालघटिका उपहारः दत्तः स च मे अति रुच्यः। समयस्य पालनाय घटिका मम सहायतां करिष्यति। मम अस्या अपेक्षा आसीत्। इदानीम् अहं अधिकतरं सर्वेषु दैनिककार्येषु नियमितो भविष्यामि। तेन च शरीरस्य ज्ञानस्य च पुष्टये अधिकं प्रयत्नं करिष्यामि। भवान् मम हृदयान्तस्तलात् उद्गतान् धन्यवादान् स्वीकरोतु। अहं सदा भवतां कृपादृष्टिं कामये।

पूज्यपितृव्यायै नमः। बन्धुभ्यः स्नेहः।

भवदीयः पुत्रः,
आनन्दकुमारः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

17. (विषयः—शुल्कदण्डक्षमार्थं प्राचार्यं प्रति पत्रम्)

राष्ट्रियविद्यालयः,
करनाल।
तिथिः.........

श्री प्राचार्य महोदय !

सादरं नमोनमः।

निवेदनं इदं यत् गते दिवसे यदा अहं विद्यालयं प्राप्तः तदा मम समीपे अकस्मादेव प्रत्यभिज्ञानपत्रं (Identity Card) न आसीत्। ततोऽहं विद्यालयस्य शरीरशिक्षाप्रमुखेन निगृहीतः। भवता च तदवलम्ब्य अहं पञ्चरुप्यकशुल्कदण्डेन दण्डितः। मम समीपे सदैव प्रत्यभिज्ञानपत्रं गुटिकायां तिष्ठति स्म। परं ह्यः नव-वस्त्रपरिधानात् तत् गृहे एव विस्मृतम्। नाहं प्रकृत्या प्रमादी तेन प्रथमोऽयं मम दोषः क्षन्तव्यः शुल्कदण्डञ्च निरस्तं करणीयम् इति मे निवेदनम्।

भवदाज्ञाकारी शिष्यः,
गौतमः
12, क्रमांकः
दशमी श्रेणी।

18. (विषयः—विद्यालयात् दिनद्वयावकाशार्थं प्राचार्यं प्रति पत्रम्)

पूज्यप्राचार्यमहोदय !

सादरं नमोनमः।

निवेदनम् इदं यत् अस्य मासस्य तृतीयचतुर्थतिथ्योः मम भ्रातुः विवाहः स्थिरः। तस्मात् अहं तयोः तिथ्योः अवकाशं याचामि। अतः कृपया दिनद्वयस्य अवकाशः मह्यं देय इति प्रार्थना।

भवदीयो विनीतः शिष्यः,
युगराजः
10, क्रमांकः
अष्टमी कक्षा।

19. (विषयः—राष्ट्र-सेवा-शिविर-वृत्तान्तं भगिनीं प्रति)

10, छात्रावासः,
लक्ष्मणपुर।
तिथिः ....

अदरणीये भगिनि !

सादरं नमोनमः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भवत्पत्रं प्राप्तम् । धन्यवादः ।

भगिनि ! वयं ह्य एव राष्ट्रसेवाशिविरात् निवृत्ताः । समीपस्थे जयपुरग्रामे इदं शिविरम् आयोजितम् अभवत् । अस्मिन् ग्रामे हिन्दवश्च मुस्लिमाश्च वसन्ति । तत्र वयं द्वादशछात्राः गताः । शिविराध्यक्षः अस्माकं संस्कृताध्यापक आसीत् । ग्रामः सामान्याकार एव । वयं यत्र कुद्दालान्, क्षुरप्रान्, करण्डान् च आदाय गताः । तत्र इतस्ततो वीथीषु गर्ता आसन् । ते अस्माभिः दूरतो मृत्तिकां खात्वा करण्डान् भृत्वा नीत्वा पूरिताः । क्वचित् क्वचित् इष्टकान् योजयित्वा मार्गाः सुगमाः कृताः । अत्र दक्षिण-भागे दरिद्राणां वसतिः । तत्र अवकरस्य उच्चया अस्माभिः दूरीकृताः, स्थानानानि शोधितानि च । सायं वयं ईश्वरप्रार्थनोध्वं गीतानि गायामः स्म तत्र च बालाः, युवानः वृद्धाश्च उपस्थिता भवन्ति स्म । अस्माभिः सप्तसु एव दिवसेषु ग्रामस्य कायाकल्पः कृत इति ते अस्मान् बहु प्रशंसन्ति स्म । वयमपि "परिश्रमः प्रार्थनाकल्पः" "Work is worship" इति मत्वा तत् तत् सर्वं सहर्षं कृतवन्तः । अन्तिमदिने अस्माकं सम्माने ग्रामीणैः शुद्धं सारवत् च भोजनं दत्तम् । डिण्डिमनादश्च सुचिरं कारितः । तत ऊर्ध्वं वयं ततो निवृत्ताः । अस्तु ।

पूज्याय आवुत्ताय नमोनमः ।

भवदीयः प्रियभ्राता,
नरेन्द्रः ।

20. (विषयः—धनलिप्सा दुःखदायिनी इति विषये मित्रं प्रति पत्रम्)

8, प्रेमनगर,
करनाल ।
तिथिः........

प्रियमित्र जगदीश !

सप्रेम नमोनमः ।

तव पत्रं प्राप्तम् । धन्यवादः ।

तव मानसिकं कष्टं ज्ञात्वा अहमपि चिन्तापरो जातः । त्वम् अर्थलाभाय दिवानिशं चेष्टमानः तिष्ठसि । यद्यपि तव निजः विस्तृतः आवासोऽस्ति यत्र फलवृक्षाः, शाकार्थं भूमिश्च तिष्ठति । तव मासिक आयोऽपि त्रिसहस्रं वर्तते । पुनरपि दिवानिशं कथं धनार्जने व्यापृतोऽसि ? न त्वम् अधमर्णः । पुत्रास्ते कर्मकुशला आज्ञापराश्च । तदपि उत्तरोत्तरं कर्मवृद्धये चेष्टमानस्त्वं व्याकुलस्तिष्ठसि । लोभस्तु निरन्तो दुःखदायी च । सन्तोषं किंचिद् भज । तदैव त्वं शान्तः स्वस्थश्च स्थास्यसि । नान्यथा । इदानीं तव पुत्रा अपि अर्जयन्ति इत्यतः सन्तोषो विधेयः । अर्थसंयमं कुरु । अन्यथा स्वास्थ्यहानेः आशंका । अस्तु, किमधिकं बुद्धिमत्सु ? आदरणीयभगिन्यै नमोनमः । प्रिय-पुत्रेभ्यः स्नेहः ।

भवदीयः विश्वस्तः सुहृत्,
कमलाकान्तः ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

21. (विषयः—उद्योगप्रदर्शिनीविषये भ्रात्रे पत्रम्)

छात्रावासः,
मध्यमार्गः,
दिल्ली।
तिथिः.........

आदरणीय भ्रातः !

सप्रेम नमोनमः।

तव पत्रं प्राप्तम्, धन्यवादः।

गतमासे अत्र एका उद्योगप्रदर्शिनी आयोजिता अभवत्। ताम् द्रष्टुं बहवो जनाः प्रतिदिनम् आगच्छन्। वयमपि छात्राः संभूय तत्र वारद्वयं अगच्छाम। तत्र अनेके कक्षा आसन्। पृथक्-पृथक् कक्षेषु पृथक्-पृथक् दर्शनीया उद्योगा आयोजिता आसन्। ग्रामोद्योगानाम् तत्र प्रधानता आसीत्। एकस्मिन् कक्षे तैलनिष्कासनाय कोल्हू-यन्त्राणाम् प्रदर्शनम् आसीत्। शक्त्या प्रचलताम् प्रपीडनकानाम् तत्र प्रदर्शनम् आसीत्। तन्तुभिः वस्त्रनिर्माणाय तुरीवेमादीनाम् प्रदर्शनम् शक्तिचालितवस्त्रयन्त्राणाम् च प्रदर्शनम् अक्रियत्। अन्यत्र उपानत्-निर्माणस्य प्राचीनः, यन्त्रशक्त्याऽर्वाचीन च विधिः प्रदर्शितः अभवत्। एकत्र पुरातनहलानाम्, सहैव च आधुनिकहलानाम् प्रदर्शनम् कृतमास्त। मुद्रणयन्त्राणाम् एकस्मिन् कक्षे प्रदर्शनम् आसीत्। एकत्र कर्गलनिर्माण-विधिः अन्यत्र च पात्राणाम् निर्माणस्य कक्षः अतिष्ठत्। इत्यमेव काष्ठासननिर्माणोद्यो-गश्च अभवत्। एते उद्योगा धनार्जनाय अल्पधनविनियोगेन स्वावलम्बतया स्वतन्त्रता-जीविकामार्गं बोधयन्ति इति श्लाघ्याश्च लाभकराश्च। अस्तु। पितृभ्यां नमोनमः।

भवदीयः प्रियो भ्राता,
हरीशः।

22. (विषयः—विद्यागौरवविषये भगिनीं प्रति पत्रम्)

30, अलकापुरी,
कानपुर।
तिथिः.........

स्नेहमयि भगिनि !

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु।

तव पत्रं लब्धम्। वृत्तञ्च ज्ञातम्। पठने प्रवृत्तिः कथं न अस्ति ? कथं विरागो जायते पठनात् ? इदं तु नोचितम्। पश्य, विद्यालाभात् नरः विद्वान् जायते। विद्वान् च सर्वत्र यशो लभते धनञ्च। अपठितस्य किं जीवनम् ? अपठितः केवल शरीरेण श्रमं कर्तुं शक्नोति। परं तेन समाजे गौरवस्थानं न लभते। विद्वान् विचाराणाम् प्रसारणात् समाजस्य नेता भवति परम् अविद्वान् तु अनुयाता एव तिष्ठति। पठितः विद्याकारणात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सर्वत्र पूज्यते न तु तथा अपठितः। तत् भगिनि ! विचारशीला भव। समयं मानय। पठने च अप्रमत्ता तिष्ठ। यदि त्वं पठिष्यसि अहं तुभ्यं बहूनि रुचिकराणि वस्तूनि दास्यामि। अस्तु। सर्वे त्वाम् स्नेहेन अभ्युक्षन्ति।

सस्नेही भवदीयो भ्राता,
सत्येशः।

23. (विषयः—क्रीडादिवससमारोहस्य वर्णनपरं मित्रं प्रति पत्रम्)

छात्रावासः,
बिजनौर।
तिथिः.........

प्रिय मित्र रमेश ?

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु।

तव स्निग्धं पत्रं लब्धम्। धन्यवादः। अस्माकं विद्यालये परह्य एव क्रीडादिवसः मानितोऽभवत्। तत्र विद्यालयस्य छात्रा अपूर्वेण उत्साहेन विविधासु क्रीडासु भागग्रहम् अकुर्वन्। प्रधावनप्रतियोगितायाम् पञ्चदश छात्रा अभूवन्। अन्ते तु दश एव छात्राः क्षेत्रप्रतियोगितायाम् अवशिष्टा अतिष्ठन्। कबड्डीप्रतियोगितायाम् कैश्चित् कलात्मकविधिना क्रीडित्वा दर्शकानाम् मनांसि हृतानि। मल्लयुद्धे विश्वमित्रः निजप्रतिद्वन्द्विनम् अतिरिच्य स्थितः। स च अपूर्वाणि लाघवानि अदर्शयत्। फलप्रतियोगितायाम् कन्यासु अपूर्वम् औत्सुक्यम् आसीत्। कन्यकाः पुनः पुनः फलानि दन्तैः ग्रहीतुं चेष्टमाना अतर्कितं दृश्यं उपास्थापयन्। द्विचक्रिकाप्रतियोगितायां एकस्तु क्षेत्रे एव मूर्च्छितः पतितः। मन्दचालप्रतियोगितायाम् अपूर्वस्य धैर्यस्य संयमस्य च प्रदर्शनं दृष्टम्। संगीतमयासनप्रतियोगितायाम् अवर्णनीयं कौतूहलं आसीत्। सर्वे तद् दृष्ट्वा अति मोदमानाः गताः। अस्तु। कदाचित् अत्रापि आगन्तव्यम्।

भवदीयः प्रियमित्रम्,
आज्ञापालः।

24. (विषयः—स्वाध्यायप्रगतिविषयकं भ्रात्रे पत्रम्)

1, छात्रावासः,
दिल्ली।
तिथिः.........

आदरणीय भ्रातः ?

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु।

भवत्पत्रं प्राप्तम्। धन्यवादः।

यथा भवान् मां लिखति अद्य अहं भवन्तं स्वाध्यायविषये लिखामि।

अहम् आदरणीयस्य पितृमहोदयस्य, अग्रिमाः, भवत्पत्रैश्च प्रेरणाम् लब्ध्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदानीं हृदयेन पठने संलग्नोऽस्मि। मया प्रमादः त्यक्तः। अहं सर्वं कालम् विभाज्य सर्वेषु पाठ्यविषयेषु दत्तावधानोऽस्मि। प्रातः प्रातराशात् ऊर्ध्वं संस्कृतपाठस्य आवृत्तिं करोमि। अनुवादं लिखामि। स्मरणीयं स्मरामि च। ततः नागरिकशास्त्रं (Civics) पठामि, लिखामि च। रात्रौ भोजनात् ऊर्ध्वं आंग्लभाषां, हिन्दीभाषां च पठामि। इतिहासे नाधिकं श्रमम् अपेक्षते। स तु विद्यालये एव स्मर्यते। इदानीं मया गुरुजनवचनात् प्रतिविषयं अग्रिमपाठा अपि पूर्वं एव वाच्यन्ते विचार्यन्ते च। अहं स्वयम् अनुभवामि यत् अहं स्वाध्यायम् अधीयन् प्रगतिपरो भवामि। भवता इदानीं चिन्ता न कार्या। अस्तु। मातृपितृभ्यां नमोनमः।

भवदीयः प्रियो भ्राता,
साधुरामः।

25. (विषयः—शुल्क-क्षमा-प्रार्थना-पत्रम्)

श्रीमन्तः मान्याः प्रधानाचार्यमहोदयाः,
रामजस-उच्चतर-माध्यमिक-विद्यालयः,
दिल्ली।

मान्यवर,

तत्रभवताम् सेवायाम् सविनयम् निवेदनं 'यत् मम पिता प्रारम्भिकपाठशालायाम् अध्यापकः। पञ्चाशदधिकद्विशतपरिमिते मासिके वेतने परिवारस्य चतुर्णाम् सदस्यानां पालनपोषणं करणीयम् अतिकठिनम्। विद्यालयस्य शिक्षाशुल्कस्य प्रदानेन तु तत् कठिनतरं भवति। उच्चतरं शिक्षां प्राप्य धनोपार्जनयोग्यम् आत्मानं कर्तुं मे बलवती इच्छा वर्तते। यया प्रेरितोऽहं कठिन-परिश्रमेण अध्ययनं कुर्वन् गतवर्षे नवमकक्षायाः परीक्षां प्रथम-श्रेण्याम् उत्तीर्णवान्। धनाभावेन कदाचित् मदध्ययने व्याघातः न स्यात्। अतः मम प्रार्थना यत् शिक्षा-शुल्क-प्रदानात् मां मोचयित्वा अनुगृह्णन्तु अत्रभवन्तः।

श्रीमतां वशंवदः,
पार्थसारथिः।
दशमकक्षायाः छात्रः।

दिनांक—8-4-85

26. (विषयः—विदेशस्थाय पत्रमित्राय मैत्री-सम्बन्ध-स्थापना-विषयकं पत्रम्)

10, आनन्दपुर,
अम्बाला छावनी।
तिथिः.........

महाभाग,

निवेदनं इदं यत् हिन्दुस्थान-समाचारपत्रात् मया भवन् नाम ज्ञातं परिचयश्च लब्धः। यथा भवान् विदेशस्थः पत्रमित्रतां इच्छति तथैव अहमपि इच्छामि। यथा भवान् इंगलिश-साहित्यरसिकः तथैव अहमपि अत्र भारते वसन् संस्कृतसाहित्यरसिकः। यथा भवान् आयुषा प्रौढः तथैव अहमपि प्रौढः। यथा भवान्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

घनाय सविशेषं महत्त्वं न ददाति, अहमपि तथैव विचारयामि। भवान् प्रबुद्ध-प्रकाशित-अन्तःकरणानां जनानां संगतिं कामयते। अहञ्चापि तत्स्वभाव एव। अहम् अनेकैः प्रकारैः भवता सह अनुगुणः। तत एव अहं भवता सह पत्रमित्रतां कर्त्तुं प्रवृत्तः।

कृपया निज-व्यक्ति विषये, निजरुचिविषये, निजपरिवारविषये च समयात् समयं उदारतया लिखनीयं यथा आवयोः मित्रता परस्पर-पत्राचारेण उत्तरोत्तरं वर्धेत।

भवतां, परिवारस्य च स्वास्थ्यं समृद्धिं च कामयमानः

भवतां सुहृत्,
दिवाकरः।

27. (विषयः—स्वमातुलं विदेशात् आत्मागमन-सूचकं पत्रम्)

विदेह-भवन,
चौड़ी बाजार,
लुधियाना।
तिथिः.........

मान्य मातुल !

सादरं नमोनमः।

भवान् इदं ज्ञात्वा प्रसन्नो भविष्यति यत् अहं अस्मिन् एव सप्ताहे स्काटलैण्डतः भारतं प्राप्तोऽस्मि। अहं अत्र एक एव आगतोऽस्मि। यात्रा-व्ययाधिक्य-कारणात्, शीतर्त्तु-कारणाच् च न अन्यः कोऽपि मया सह आयातः। चिराय सुदूर-प्रवासात् अन्तर्हृदये उत्सुकता-उद्भवो भवति स्म स्वबन्धून् द्रष्टुम्। तेनैव अन्यैः अविदित एव अहम् अत्र प्राप्तोऽस्मि।

मां लब्ध्वा मातापितरौ अति प्रसन्नौ जातौ। भगिन्यः अपारां प्रसन्नतां प्रकटयन्ति। लघुभ्रातरः मम संगं एव न त्यजन्ति। सखायः स्नेहेन आपूर्णा दृश्यन्ते।

निवर्त्तनात् पूर्वं अहं भवद्-दर्शनाय अवश्यं भवत्-आवासं प्राप्स्यामि। मम आदरणीया मातुलानी कीदृशी? बालनां कः समाचारः? मान्यायै मातुलान्यै प्रणामाः। बालेभ्यः स्वस्ति।

पत्रोत्तर-प्रतीक्षापरः।

भवतां वत्सलः,
प्रभातकुमारः।

28. (विषयः—परीक्षासाफल्यात् मित्राय वर्धापन-पत्रम्)

सावित्री-सदन,
माडल टाउन,
पानीपत।
तिथिः.........

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रिय प्रमोद !

सस्नेहं नमोनमः।

तव परीक्षासफलता-पत्रं अद्यैव लब्धम्। तव सफलतां ज्ञात्वा मम महान् सन्तोषः, प्रसन्नता च। यद्यपि त्वं आकस्मिकज्वरवशात् चिराय कष्टं गतः, तथापि परीक्षायां द्वितीयां श्रेणीं लब्ध्वा उत्तीर्णवान् इति सत्यं प्रमोदकरः। त्वं मम च मम पारिवारिकजनस्य च साधुवादान् अर्हसि। तव सफलतापत्रं लब्ध्वा अचिरमेव मिष्टान्नं आनाय्य मया तस्य वितरणं गृहे च बहिश्च कृतम्।

मित्र ! येषु विषयेषु त्वया हीना अंकाः प्राप्ताः तेषु उत्तरवर्त्तिन्यां परीक्षायां अधिकान् अंकान् प्राप्तुं सततं सावधानस्तिष्ठ। तथा यतस्व यथा स्वास्थ्यं च पठनञ्च निरन्तरं समबलं एव तिष्ठेत्। एकः एकस्य कारणात् हीनो न स्यात्।

पत्रस्यान्ते अहं ते पुनरपि भूयोभूयः वर्धापनं कामये। मातापितृभ्यां सादरं नमोनमः।

तव स्निग्धमित्रम्,
आकाशदीपः।

29. **(विषयः—कन्या-शिक्षा-महत्त्व-बोधन-पुरस्सरं महाविद्यालये शिक्षा-लाभाय कन्याया मातरं प्रति पत्रम्)**

क्रान्ति-कुटीर,
दरियागंज,
दिल्ली।
तिथिः.........

मम सातिशयमान्यमातः !

भूयो भूयो वन्दे।

अत्र कुशलं तत्रास्तु।

निवेदनं इदं यत् आगामिनि शिक्षासत्रे अहं विद्यालयं प्रविश्य पठेयं इति मम मनसि पुनः पुनः जायते। मातः ! कन्यकाभिः भविष्यज् जीवने गृहस्य भारः, समाजस्य भारः, राष्ट्रस्य च भारः वहनीयो भवति यथा पुरुषैः। यथा एकस्मिन् योक्त्रे द्वौ वृषभौ भवतः तथैव गृहस्थयोक्त्रे स्त्रीपुरुषौ भवतः। सुपठितस्य बहुज्ञस्य पुरुषस्य इव स्त्री अपि सुपठिता बहुज्ञा यदि भवति तत् युगलं शोभते नान्यथा। सम्यक् पठिता बहुज्ञा स्त्री न केवलं गृहस्य भूषणं, समाजस्य, राष्ट्रस्य चापि भूषणम्। तस्मात् महाविद्यालये शिक्षार्थं प्रवेशाय अहं भवदनुमतिम् इच्छामि। कतिपयदिनोर्ध्वं अहं भवत्-समीपे प्राप्स्यामि ततश्च निजं इष्टं अधिकाधिकैः तर्कैः समर्थयिष्यामि। अस्तु ! गृहे भ्रातरः भगिन्यश्च मम वचनात् प्रेम्णा सभाजनीयाः।

भवत्प्रिया दुहिता,
आशा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

30. (विषयः—विदेशस्थं मित्रं प्रति भारतर्त्तु-विषयकं पत्रम्)

प्रयाग-भवन,
महाराणा प्रताप मार्ग,
झाँसी।
तिथिः.........

प्रिय डेविडपाल !

स्निग्धस्निग्धा नमस्काराः।

अत्र कुशलं तत्रास्तु।

तव पत्रं प्राप्तम्। धन्यवादाः। त्वया भारतदेशस्य काश्चन विशेषताः पृष्टाः। तत्र ऋतुविषयकविशेषताम् अद्य अहं अस्मिन् पत्रे लिखामि।

मित्र ! अस्माकं देशे षड् ऋतवः प्रतिवर्षं चक्ररूपेण भ्रमन्ति। प्रत्येकं ऋतुः द्वाभ्यां द्वाभ्यां मासाभ्यां तिष्ठति। यथा नटा दर्शकाणां मनोरञ्जनाय वेद्याम् आयान्ति यान्ति च तद्वत् प्रकृतेः वेद्यां एते ऋतवः वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर-नामानः आयान्ति च यान्ति च। एभिः द्वयोः द्वयोः मासयोः कृते भूमौ निजा निजा विचित्रता पर्यवतिष्ठते। भवतां देशे तु न तथा यथा अत्र। ऋतूनां यः उदारतया समयात् समयं भारते अवतारः तथा अन्येषु देशेषु पूर्णतया न। यदा भवान् अस्माकं देशं प्राप्य एकवर्षाय अत्र वासं करिष्यति तदा मम कथनस्य सत्यता प्रमाणिता भविष्यति। अस्तु। निजपारिवारिका मद्वचनेन आदरेण प्रेम्णा च सभाजनीयाः। काचन सेवा सूचनीया।

भवन् मित्रम्,
प्रदीपकुमारः।

31. (विषयः—मित्राय भगिनीविवाहस्य निमन्त्रणपत्रम्)

938, सेक्टर 4,
अरबन एस्टेट,
गुरुग्रामः,
तिथिः.........

प्रियमित्र राहुल !

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु।

इदं प्रीतिदायकं वृत्तं भवन्तं सूचयित्वा अहम् अतीव आनन्दम् अनुभवामि यत् मम भगिन्याः विवाहः अग्रिममासस्य दशम्यां तारिकायां, बुधवासरे, निश्चितः जातः। वरयात्रा लक्ष्मणपुरात् आगमिष्यति। अहं त्वाम् प्रेमपूर्वकं पूर्वतः एव ज्ञापयामि येन त्वम् अत्र त्रिचतुर्दिनानि पूर्वतः एव प्राप्तः स्याः। भवता पितृभ्यां सह अत्र अवश्यमेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आगन्तव्यम् । भवतां स्निग्धां सङ्गतिं साहाय्यं च अहं कामये। आदरणीयाभ्यां पितृभ्यां सस्नेहं नमोनमः ।

तव पत्रोत्तरं प्रतीक्षमाणः

भवत्सुहृद्,
प्रियव्रतः

32. (विषयः—पित्रे रक्तदानशिविरविषयकं पत्रम्)

परीक्षाभवनम्,
तिथिः.........

पूज्य पितृमहोदय,

चरणवन्दना !

अत्र कुशलं तत्रास्तु ।

अद्याहं भवन्तं निवेदयामि यद् अस्माकं विद्यालये गतसप्ताहे रक्तदान-शिविरम् आयोजितम् । अस्माकं कक्षाप्रमुखः अध्यापकः श्रीमान् रामचन्द्रः शिविरस्य प्रमुखः आयोजकः आसीत् । सः प्रथमं स्वरक्तं प्रायच्छत् । तदनन्तरम् दशमकक्षायाः पञ्च छात्राः एतस्मिन् शुभकार्ये अग्रेसराः अभवन् । तेषाम् उत्साहं दृष्ट्वा मम मनसि अपि भावना सञ्जाता तथा च मयाऽपि स्वरक्तम् प्रदत्तम् । आशासे यद् भवान् मम एतां भावनां दृष्ट्वा प्रसन्नो भविष्यति । अहं पूर्णतया सकुशलोऽस्मि । चिन्तया अलम् ।

भवदाज्ञाकारी,
क ख ग ।

33. (विषयः—मित्राय एशियाडक्रीडाविषयकं पत्रम्)

परीक्षासदनम्,
तिथिः.........

प्रियसुहृद् राजवीर,

सस्नेहं नमस्कारः ।

भवान् सम्यक् जानाति एव यद् कतिपयवर्षपूर्वं भारतदेशे नवम-एशियाड क्रीडा-महोत्सवः सम्पन्नः आसीत्, तत्र च एकविंशतिः क्रीडाः क्रीडिताः । तासु क्रीडासु अश्वारोहणधावनप्रतियोगिता मह्यम् अतिशयरुचिकरा आसीत् । भारतदेशः एतस्यां क्रीडायां त्रीन् स्वर्णपदकान् एकं कांस्यपदकम् एकं च रजतपदकमपि जितवान् । भारतीयाः अश्वारोहिणः अतीव उत्साहवन्तः आसन् ते च वायुना सह आकाशे उड्डयमानाः प्रतीयन्ते स्म । अद्यापि अहं तद् दृश्यं अधुनैव घटमानम् इव अनुभवामि । पत्रोत्तरे भवान् अपि स्वरुचिकरक्रीडाप्रतियोगितायाः विषये लिखतु ।

पितृभ्यां सादरं नमः !

तव अभिन्नहृदयः,
क ख ग ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

34. (विषयः—मित्राय जन्मदिवसविषयकं पत्रम्)

परीक्षाभवनम्,
तिथिः.........

प्रिय ललित !

सस्नेहं नमस्कारः ।

यद्यपि वार्षिकपरीक्षायां व्यस्ततया भवता मम जन्मदिवसोत्सवस्य आनन्दः न लब्धः, तथापि आशासे यत् तस्य वर्णनं पठित्वा अपि भवान् कमपि आनन्दम् अवश्यमेव लप्स्यते । केकक्न्तनस्य आधुनिकरीतिं विहाय यज्ञहोमादिकस्य भारतीयसरणिम् अवलम्ब्य अयमुत्सवः मानितः। पुरोहितमहोदयेन आशीर्वचसा ममोपरि सर्वेषाम् आगन्तुकानां पक्षतः शुभकामना प्रदत्ता। तदनन्तरं हास्यरसपूर्णम् एकलाभिनयम् दृष्ट्वा सर्वे अमन्दम् आनन्दम् अन्वभवन् इत्यलम् ।

विस्तरेण तु परस्परं मिलित्वा बोधयिष्यामि । इति ।

भवदीयमित्रम्,
क ख ग ।

34. (विषयः—पित्रे परीक्षावर्णनविषयकं पत्रम्)

परीक्षाभवनम्,
तिथिः.........

पूज्य पितृमहोदय !

सादरं प्रणामाः !

अत्र कुशलं तत्रास्तु ।

भवदीयं पत्रम् अद्यैव लब्धम्। भवान् मम परीक्षाविषये ज्ञातुम् अतीव आतुरोऽस्ति । अद्य मया गणितविषये सर्वे प्रश्नाः सम्यक् समाहिताः इति विज्ञाय भवान् अतीव प्रसन्नो भविष्यति । आशासे यदहम् अन्यविषयेष्वपि प्रश्नानां सन्तोषप्रदानि उत्तराणि दास्यामि । भवताम् आशीर्वादेन अहं कक्षायां प्रथमं स्थानं लप्स्ये, प्रथमश्रेण्यां च तु नूनं सफलो भविष्यामि । न काऽपिचिन्ता भवद्भिः करणीया ।

मातृचरणयोः मम प्रणामाः सन्तु !

भवदाज्ञाकारी पुत्रः,
क ख ग ।

अभ्यास

(परीक्षाओं में पूछे गए प्रश्न)

1. स्वाध्ययन-प्रगति-विषयकं पत्रं पञ्चाशच्छब्दपरिमितं ज्येष्ठमात्रे निवेदयत ।
2. 'राष्ट्रीय प्रेम एव जीवने सर्वस्वम्' इति विषयमभिलक्ष्य विदेशगतं मित्रम् संस्कृतभाषया एकं पत्रं लिखत ।

Funding by IKS-MoE
अथवा

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वविद्यालये आयोजितं क्रीडादिवससमारोहम् वर्णयन् स्वमित्रम् प्रति संस्कृतभाषया एकं पत्रम् लिखत ।

3. (*i*) स्वपितुः पदोन्नतिसमाचारमाकर्ण्य यः आनन्दः अनुभूतः, तस्य वर्णनम् पत्रमाध्यमेन एकवाक्येन विधीयताम् पत्रम् मित्रस्य समीपे प्रेषणीयम् ।

(*ii*) निम्नलिखित महानुभावसम्बोधने कीदृक् शब्दप्रयोगः कर्त्तव्यः ?—
राष्ट्रपतिः पितामहः, जिलाधीशः ।

(*iii*) प्रधानाचार्याय शुल्कक्षमार्थम् प्रार्थनापत्रमेकं लिखत ।

4. अधोलिखितेषु एकं विषयमधिकृत्य स्वभगिनीं संस्कृतभाषया पत्रम् लिखत :—

(*i*) विद्यायाः गौरवम्; (*ii*) धनस्य लिप्सा सर्वदैव दुःखदायिनी; (*iii*) उद्योगप्रदर्शनी; (*iv*) राष्ट्रसेवाशिविरः ।

5. अनुपस्थितिक्षमाविषयकपत्रम् पञ्चाशच्छब्दपरिमितम् प्राचार्यमहोदयाय निवेदयत ।

6. विद्यालयतः अवकाशं ग्रहीतुं संस्कृतभाष्या पत्रमेकं लिखत ।

अथवा

दीपावलीमहोत्सवमाश्रित्य स्वमित्रम् प्रति संस्कृतभाषया पत्रमेकं लिखित ।

7. कतिपयपुस्तकप्रेषणार्थं कमपि पुस्तकप्रकाशकं पञ्चाशच्छब्दपरिमितं पत्रम् संस्कृतभाषया लिखत ।

8. छात्रावासजीवनविषयमधिकृत्य स्वपितरं प्रति संस्कृतभाषया पत्रमेकं लिखत ।

अथवा

स्वविद्यालयस्य वार्षिकोत्सवः वर्णनपरं स्वमित्रम् प्रति संस्कृतभाषया पत्रमेक लिखत ।

9. स्वपित्रे परीक्षाशुल्कप्रदानाय पञ्चाशद्-रूप्यक-प्रेषणार्थं पत्रम् लिखत ।

10. स्वमातुलं पितृव्यं वा विदेशात् आत्मागमनसूचनां दातुं एकं पत्रम् लिखत ।

11. कन्यानां शिक्षायाः महत्त्वमुपदर्शयन् स्वमात्रे महाविद्यालये स्वशिक्षाग्रहण-सम्मतिप्राप्त्यर्थं पत्रम् लिखत ।

12. मित्राय परीक्षासाफल्यमुद्दिश्य वर्धापनपत्रम् लिखत ।

13. अपरिचिताय पत्रमित्राय (Penfriend) मैत्रीसम्बन्धम् स्थापयितुं स्वाभिलाषं दर्शयन् पत्रम् लिखत ।

14. विदेशस्थितं निजमित्रं भारतदेशस्य ऋतूनां विषये संस्कृतभाषया एकं पत्रं लिखतं ।

विदेश में रहने वाले अपने मित्र को भारत की ऋतुओं के विषय में संस्कृत में एक पत्र लिखो ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Write in Sanskrit a letter to your friend in foreign country describing him various seasons of India.

15. स्वपरीक्षाविषये पितरं प्रति पञ्चाशच्छब्दपरिमितं पत्रं लिखन्तु ।
अपनी परीक्षा के विषय में पिता जी को पचास शब्दों में पत्र लिखिए ।

Write a letter to your father describing your examination in not more than fifty words.

16. अवकाशाय प्राचार्यमहोदयं प्रार्थनापत्रमेकं पञ्चाशच्छब्दपरिमितं लिखन्तु ।

17. विद्यालय में आयोजित रक्तदान शिविर के विषय में संस्कृत में अपने पिता जी को तीस शब्दों में पत्र लिखिए ।

18. अपनी बहिन के विवाह के अवसर पर अपने मित्र को संस्कृत में निमन्त्रण-पत्र लिखिए ।

19. एशियाड खेल प्रतियोगिताओं में अपनी रुचि की प्रतियोगिता के विषय में संस्कृत में तीस शब्दों में अपने मित्र को पत्र लिखिए ।

20. अपने जन्मदिवस के उत्सव के विषय में अपने मित्र को तीस शब्दों में पत्र लिखिए ।

—o—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

7

परिशिष्ट

(व्यावहारिक शब्दकोष)

अँगीठी—हसन्ती
अंगूर—द्राक्षा, मृद्वीका
अञ्जीर—अञ्जीरम्
अखरोट—अक्षोटम्
अचार—सन्धितम्
अण्डरवीयर—अर्धोरुकम्
अदरक—आर्द्रकम्
अनार—दाडिमम्
अभ्रक—अभ्रकम्
अमचूर—आम्रचूर्णम्
अमरूद—अमृतफलम्, दृढ़बीजम्
अरहर—आढकी
अलमारी—मञ्जूषा
आँवला—आमलकी
आक—अर्कः
आड़ू—आर्द्रालुः
आढत—अभिकरणम्
आरामकुर्सी—सुखासन्दिका
आलू—आलुः
आलू बुखारा—आलुकम्
इन्फ्लुएंजा—शीतज्वरः
इमली—तिन्तिडीकम्
इलायची—एला
उडद—माषः
उबटन—उद्वर्तनम्
ऊँट—उष्ट्रः
ऊखल—उलूखलम्
ऊनी—राङ्कवम्
एजेण्ट—अभिकर्ता
एरंड—एरण्डः

ओढनी—प्रच्छदपटः
ओवरकोट—बृहतिका
कंगन—कङ्कणम्
कंघी—प्रसाधनी
कंठा—कण्ठाभरणम्
कधा—स्कन्धः
ककड़ी—कर्कटिका
कचालू—पक्वालुः
कचौड़ी—पिष्टिका
कटहल—पनसः
कटोरा—कटोरम्
कटोरी—कटोरा
कड़ा—कटकः
कद्दू—कूष्माण्डः
कनफूल—कर्णपूरः
कनेर—कर्णिकारः
कप—चषकः
कब्ज—अजीर्णः
कमरख—कर्मरक्षम्
कमीशन—शुल्कम्
कमीशन एजेण्ट—शुल्काजीवः
करेला—कारवेल्लः
करौंदा—करमर्दकः
कलम—कलमः
कलमी आम—राजाम्रम्
कलाकन्द—कलाकन्दः
काँच का गिलास—काचकंसः
कुंडल—कुण्डलम्
कापी—संचिका
कॉफी—कफघ्नी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कार्टून—उपहासचित्रम्
कील—कील:
कुतिया—शुनी
कुत्ता—श्वन्
कुप्पी—कुतू:
कुम्हार—कुलाल:
कुर्ता—कञ्चुक:
कुलफी—कुलपी
कुली—भारवाह:
कूड़ा—अवकर:
केकड़ा - कुलीर:
केतली—कन्दु:
केन्सर—विद्रधि:
केला—कदलीफलम्
केवड़ा—केतकी
कैंची—कर्तरी
कै—वमथु:
कोट—प्रावार:
कोतवाल—कोटपाल:
कोल्हू—रसयन्त्रम्
कोहनी—कफोणि:
कलर्क—करणिक:
खजूर—खर्जूर:
खप्पर—खर्पर:
खरबूजा—खर्बुजम्
खस्ता पूरी—शष्कुली
खाँसी—कास:
खाट—खट्वा
खाद—खाद्यम्
खिचड़ी—कृशर:
खिरनी—क्षीरिका
खीर—पायसम्
खील—लाजा:
खुमानी—क्षुमानी
खूँटी—नागदन्तक:

खैर—खदिर:
गंडासा—तोमर:
गगरी—गर्गरी
गजक—गजक:
गञ्जा—खल्वाट:
गडरिया—अजाजीव:
गद्दा—तूलसंस्तर:
गली—वीथिका
गाजर—गृञ्जनम्
गिरहकट—ग्रन्थिभेदक:
गिलास—कंस:
गिलोय—अमृतवल्लरी
गुझिया—संयाव:
गुलाब—स्थलपद्मम्
गूलर—उदुम्बरम्
गेंद—कन्दुक:
गेहूँ—गोधूम:
गोबर—गोमयम्
गोभी—गोजिह्वा
घाटी—अद्रिद्रोणी
घी—आज्यम्
घुंघुरू—किंकिणी
घेवर—घृतपूर:
घोंसला—कुलाय:
चकवा—चक्रवाक:
चकोतरा—मधुकर्कटी
चचेरा भाई—पितृव्यपुत्र:
चटकनी—कील:
चटनी—अवलेह:
चपत—चपेट:
चपरासी—लेखहारक:
चप्पल—पादुका
चबूतरा—चत्वरम्
चमचा—दर्वी
चमेली—मालती

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चम्पा—चम्पकः
चम्मच—चमसः
चाकू – छुरिका, लवित्रम्
चाचा—पितृव्यः
चाय—चायम्
चावल—व्रीहिः
चिमटा—संदंशः
चिरौंजी—प्रियालम्
चिलमची—हस्तधावनी
चीड़—भद्रदारुः
चीनी—सिता
चील—चिल्लः
चुंगी—शुल्कः
चुगलखोर—द्विजिह्वः
चुन्नी – प्रच्छदपटः
चूल्हा—चुल्ली
चेचक—शीतला
चूड़ी—काचवलयम्
छज्जा—वलभी
छत—छदिः
छाता—आतपत्रम्
छुहारा—क्षुधाहरम्
छेनी—वृश्चनः
जमाई—जामातृ
जलेबी—कुण्डली
जस्त—यशदम्
जामुन—जम्बुः
जार—काचघटी
जिगर—यकृत्
जीजा—आवुत्तः
जीरा—जीरकः
जुकाम—प्रतिश्यायः
जुलाहा—तन्तुवायः
जूता—उपानह्
जूही—यूथिका

जौ—यवः
ज्वार—यवनालः
झाड़ू—मार्जनी
टकसाल—टङ्कशालः
टमाटर—रक्ताङ्गः
टब—द्रोणी
टाफी—गुल्यः
टिण्डा—टिण्डिशः
टिड्डी—शलभः
टीका—ललाटिका
टीन—त्रपु
टेलर—सौचिकः
ट्रैक्टर—खनियन्त्रम्
डबल रोटी—अभ्यूषः
डस्टर—मार्जकः
डाएबिटीज़—मधुमेहः
डाकगाड़ी—द्राक्यानम्
डाक्टर—भिषग्वरः
ड्राईक्लीनर—निर्णेजकः
ढोलक—ढोलकः
तकिया—उपधानम्
ततैया—वरटा
तन्दूर—कन्दुः
तपेदिक—राजयक्ष्मन्
तबला—मुरजः
तरबूज—तर्बुजम्
तवा—ऋजीषम्
तसला—घिषणा
तश्तरी—शरावः
तिजोरी—लौहमञ्जूषा
तिपाई—त्रिपादिका
तिमंजला—त्रिभूमिकः
तितली—प्लीहा
तुरही—तूर्यम्
तेन्दुआ—तरक्षुः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेली—तैलकारः
तोप—शतघ्नी
तोरी—जालिनी
थाना—रक्षिस्थानम्
थाली—स्थालिका
दराँती—दात्रम्
दरी—आस्तरणम्
दर्जी—सौचिकः
दलाल—शुल्काजीवः
दहीबड़ा—दधिवरकः
दातुन—दन्तधावनी
दालमोठ—दालमुद्गः
दुनई—द्वितयी
दुकान—आपणः
दुकानदार—आपणिकः
देवर—देवरः
देवरानी—यातृ
देहली—देहली
धतूरा—धत्तूरः
धमुंश—कोटिशः
धूप—आतपः
धोती—अधोवस्त्रम्
धोबी—रजकः
नाइलोन—नवलीनकम्
नाती—नप्तृ
नारंगी—नारङ्गम्
नाशपाती—अमृतफलम्
नींबू—जम्बीरम्
नीम—निम्बः
पकौड़ी—पक्ववटिका
पटरा—लोष्ठभेदनः
पतीली—स्थाली
पाउडर—चूर्णकम्
पैंट—आप्रपदीनम्
पेन्सिल—तूलिका

बाल्टी—उदञ्चनम्
बिस्कुट—पिष्टकः
बेसन—चणकचूर्णम्
बैंकिंग—कुसीदवृत्तिः
बैडमिण्टन—पत्रिक्रीड़ा
बाजूबन्द—केयूरम्
ब्लेड—क्षुरकम्
ब्रुश—वर्तिका, रोममार्जनी
भाला—प्रासः
भिण्डी—भिण्डकः
भूसा—तुषः
मण्डी—महाहट्टः
मक्खन—नवनीतम्
मलाई—सन्तानिका
मसूर—मसूरः
मालपूआ—अपूपः
मिस्सा आटा—मिश्रचूर्णम्
मुसम्मी—मातुलुङ्गः
मूँछ—श्मश्रु
मूली—मूलकम्
मेंहदी—मेन्धिका
मेज—फलकम्
मोतीझारा—मन्थरज्वरः
मौसी—मातृष्वसृ
रजाई—नीशारः
रजिस्टर—पञ्जिका
रजिस्ट्रार—प्रस्तोतृ
रबड़—घर्षकः
रबड़ी—कूर्चिका
रसोई—रसवती
रूई—तूलः
रैकेट—काष्ठपरिष्करः
रोटी—रोटिका
लंच—सग्धिः, सहभोजः
लपसी—यवागूः

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लहसुन—लशुनम्
लाख—जतु:
लिपस्टिक—ओष्ठरञ्जनम्
लीची—लीचिका
लोई—रल्लक:
लोटा—करक:
लोबिया—वन-मुद्ग:
लोमड़ी—लोमशा
लौकी—अलाबू:
वकील—प्राड्विवाक:
वालीबाल—क्षेपकन्दुक:
शक्कर—शर्करा
शामियाना—चन्द्रातप:
शलगम—श्वेतकन्द:
शीशम—शिशपा
शेरवानी—प्रावारकम्
शहतूत—तूतम्
सन्तरा—नारङ्गम्
सरकार—सर्वकार:
सलवार—स्यूतवर:
सलाद—शद:
साबुन—फेनिलम्
सामान—पण्य:
सामकिए—श्यामाक:
साहूकार—कुसीदक:
सिघाड़ा—शृङ्गाटकम्
सिगरट—तमाखुवर्तिका
सिलाई मशीन—स्यूतियन्त्रम्
सीढ़ी—नि:श्रेणी
सीमेण्ट—अश्मचूर्णम्
सीसा—सीसम्
सुराही—भृङ्गार:
सुपारी—पूगम्
सूती—कार्पासम्
सूद—कुसीदम्
सेक्रेटरी—सचिव:
सेम—सिम्बा
सोंठ—शुण्ठी
सोफा—पर्यङ्क:
सौंफ—मधुरा
सौदा—पण्य:
स्टूल—संवेश:
स्टेनलैस स्टील—निष्कलङ्कायस:
स्टेशन—यानावतार:
स्टेशन—यानावरोधस्थानम्
स्टोव—उद्ध्मानम्
स्लेट—अश्मपट्टिका
हंसुली—ग्रैवेयकम्
हथौड़ी—अयोघन:
हल्दी—हरिद्रा
हलुआ—लप्सिका
हलवाई—कान्दविक:
हॉकी—यष्टिक्रीडा
हाथीवान्—हस्तिपक:
हारसिंगार—शेफालिका
हिम, ओस—अवश्याय:, हिमम्
हिसाब—संख्यानम्
हींग—हिंगु:
हुक्का—धूम्रनलिका
हैजा—विषूचिका
हौज—आहाव:

—o—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE